Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# श्री जैन आत्मानन्द--ग्रंथ--रत्नमाळा.

प्रकाशक—श्री जैन आत्मानंद सभा.

भावनगर.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ अथ दशकर्मपद्धतिः प्रारभ्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ अथ दशकर्मपद्धतिग्रन्थस्थविषयानुक्रमणिका ॥


| विषयाः | पत्रांकाः | पृष्ठम् |
|---|---|---|
| अथ गर्भाधानम् | १ | १ |
| अथ पुंसवनम् | १ | २ |
| अथ सीमंतोन्नयनम् | २ | १ |
| अथ जातकर्म | ६ | १ |
| अथ नामकर्म | ९ | २ |
| अथ निष्क्रमणम् | १० | १ |
| अथान्नप्राशनम् | १० | १ |
| अथ चूडाकर्म | १४ | १ |
| अथ कर्णवेधः | १९ | २ |
| अथोपनयनम् | १९ | २ |
| अथ वेदारंभः | २५ | १ |
| अथ समावर्त्तनम् | ३० | २ |
| अथ सामग्री | ३८ | २ |
| अथ विवाहः | ३९ | १ |
| अथ कन्यादानम् | ४२ | १ |
| अथ चतुर्थीकर्म | ५३ | १ |


इति दशकर्मपद्धतिग्रन्थस्थविषयानुक्रमणिका समाप्ता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीगणेशायनमः ॥ ॥ अथगर्भाधानम् ॥ ॥ तत्रऋतुस्नाताचतुर्थदिनेवधूः प्रातस्तूष्णीमादित्यमुपतिष्ठेत् ॥ततस्तद्दिनेमातृपूजाभ्युदयिकेकृत्वाषोडशरात्रादर्वाक्शुभरात्रौ दक्षिणकरेणपतिर्वध्वाउपस्थमभिस्पृश्यजपति ॥ ॐ पूषाभगꣳसविता मेददातुरुद्रःकल्पयतुललामगुं ॥ विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिꣳशतु ॥ आसिंचतुप्रजापतिर्धातागर्भंदधातुते इतिमंत्रेण ॥ अथप्राङ्मुखउपविष्टउदङ्मुखोवा एतामभिमंत्रयेदनेन ॥ ॐ गर्भंधेहिसिनीवालिगर्भंधेहिपृथुष्टुके ॥ गर्भंतेअश्विनौदेवावाधत्तांपुष्करस्रजौ इतिमंत्रेण ॥ ततः ॐरेतोमूत्रंविजहातियोनिंप्रविशदिंद्रियं॥ गर्भोजरायुणावृतउल्बंजहातिजन्मना इतिमंत्रेणरेतःस्रावणं॥अथतस्याहृदयमालभेत्॥ॐ यत्तेसुशीमेहृदयंदिविचंद्रमसिश्रितं वेदाहंतन्मांतद्विद्यात् पश्येमशरदःशतं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जीवेमशरदःशतंशृणुयामशरदःशतमितिमंत्रेण ॥ ततःस्वस्थोत्दृष्टमनाः हृद्देशेप्रस
न्नामनातुरांकामयमानामभग्नशय्यायांप्रदोषादूर्ध्वंश्रियमभिगच्छेत् सायदिगर्भंन
दधातितदापतिःकृतोपवासःपुष्यनक्षत्रेश्वेतकंटकारिकामूलमुत्पाट्योदकेनपिष्ट्वावधू
दक्षिणनासापुटेतद्रसंदद्यात् अनेनैवमंत्रेण ॥ॐ इयमोषधीत्रायमाणासहमानासर
स्वती ॥ अस्या अहंबृहत्याःपुत्रःपितुरिवनामजग्रभमिति ॥ इतिगर्भाधानम् ॥ १॥
अथपुंसवनम ॥ ॥ तत्रगर्भमासापेक्षयाद्वितीयतृतीययोरन्यतरस्मिन्करणीयंपुष्यपु
नर्वसुमृगशिरोहस्तमूलश्रवणान्यतमपुन्नामनक्षत्रयुतोभयचंद्रतारानुकूलदिवसम
वगत्य ततःपूर्वदिनेवधूमुपवासंकारयित्वा अग्रिमदिने तस्याः स्नातायाअहतवासो ॥ १ ॥
युगपरिधानानंतरंशुचिःस्नातःकृताचमनोमातृपूजाभ्युदयिकादिकृत्वा वटप्ररोहंवट

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुंगांश्चआचारात्कुशकंटकमपिशिशिरेणजलेनपिष्ट्वा वधूदक्षिणनासापुटेतद्रसंद
द्यात् ॐ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत्॥ सदाधारपृथिवींद्या
मुतेमांकस्मैदेवायहविषाविधेम॥१॥ॐअद्भ्यःसंभूतःपृथिव्यैरसाच्च विश्वकर्मणःस
मवर्तताग्रे तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रेइतिमंत्राभ्याम्॥ इ
तिपुंसवनम्॥ २॥ ॥अथसीमंतोन्नयनम्॥ ॥ तत्रगर्भमासापेक्षयाषष्ठेष्टमेवापु
न्नामनक्षत्रयुतेचंद्रतारानुकूलविहितदिनेमातृपूजाभ्युदयिकादिकृत्वा बहिःशाला
यांकुशकंडिकांकुर्यात्॥तत्रक्रमः कुशत्रयेणहस्तपरिमितचतुरस्त्रभूमिंपरिसमुह्य कु
शानैशान्यांनिःक्षिप्य गोमयोदकेनोपलिप्य स्रुवमूलेनस्फ्येनवोत्तरतस्त्रिरुल्लिख्योल्लि
खनक्रमेणानामिकांगुष्ठाभ्यांमृदमुद्धृत्यवारिणातंदेशमभिषिच्यकांस्यपात्रेणाग्निमा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दायतत्रप्रत्यङ्मुखंनिदध्यात्ततोब्राह्मणवरणम् ॐअद्यकर्तव्यसीमंतोन्नयनहोमक
र्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिःपुष्पचंद
नतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे ॐवृतोस्मीतिप्रतिवचनम् ॐयथाविहितंकर्मकु
र्विंतिहोत्राभिहिते ॐकरवाणीतिप्रतिवचनानंतरंअग्नेर्दक्षिणतःशुद्धमासनंदत्वातदुपरि
प्रागग्रान्कुशानास्तीर्यास्मिन्सीमंतोन्नयनहोमकर्मणित्वंमेब्रह्माभवेत्यभिधाय ॐ
भवानीतितेनोक्तेअग्निप्रदक्षिणंकारयित्वाब्रह्माणंतत्रोपवेश्यप्रणीतापात्रंपुरतःकृत्वा
जलेनापूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतःकुशोपरिनिदध्यात्ततःपरिस्त
रणंबर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतंब्रह्मणोग्निपर्यंतंनैर्ऋत्याद्वायव्यांतंअग्नि
तःप्रणीतापर्यंतंततोग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयंपवित्रकरणार्थंसा ॥ २ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रमनंतगर्भकुशपत्रद्वयंप्रोक्षणीपात्रंआज्यस्थाली चरुस्थाली संमार्जनकुशाउपय
मनकुशाः प्रादेशमितपालाशसमिधस्तिस्त्रःस्रुवःआज्यंषट्पंचाशदुत्तरयजमानमुष्टि
शतद्वयावच्छिन्नतंडुलपूर्णपात्रं तिलमुद्गमिश्रास्तंडुलाःपूर्णपात्रं एतानिपवित्रच्छेद
नकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयानि तदुत्तरतःवीणागाथिनौप्रादेशमात्रसा
ग्राश्वत्थशंकुःत्रिश्वेतशल्लुकीकंटकं पीतसूत्रपूर्णस्तर्कुः दर्भपिंजलिकात्रयंउदुंबरयुग्म
फलसुवर्णघटितदेवकर्कराादियुक्तसूत्रदोरकपुष्पबिल्वादिफलयुतवाराष्टतयादिअन्य
द्यथाचारपरिप्राप्तद्रव्यमासादनीयं ततःपवित्रच्छेदनार्थकुशैःप्रादेशमितपवित्रेछि
त्वासपवित्रपाणिनाप्रणीतोदकंत्रिःप्रोक्षणीपात्रेकृत्वा अनामिकांगुष्ठाभ्यामुत्तराग्रे
पवित्रेगृहीत्वात्रिरुद्दिंगनं प्रणीतोदकेनप्रोक्षणीप्रोक्षणं ततःप्रोक्षणीजलेनयथासा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दितद्रव्यसेचनं ततोग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रनिधानंततःआज्यस्थाल्यामाज्य
निर्वापःचरौतुतिलतंडुलमुद्गानांप्रणीतोदकेनत्रिःप्रक्षालनंतत्रकिंचिज्जलंदत्वाप्रक्षेपः
ततः स्वयंचरुंगृहीत्वा ब्रह्मणाचाज्यंग्राहयित्वा वह्नेरुत्तरतश्चरुंदक्षिणतःआज्यंयुगप
न्निदध्यात् ततःसिद्धेचरौज्वलत्तृणंप्रदक्षिणंभ्रामयित्वा वह्नौतत्प्रक्षेपःततःस्रुवप्रत
पनंत्रिः ततः संमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतः स्रुवंसंमृज्यप्रणीतोदकेनाभ्यु
क्ष्यपुनस्त्रिःप्रतप्य दक्षिणतोनिदध्यात् ततःआज्यमग्नितश्चरोःपूर्वेणानीयाग्रेधृत्वाआ
ज्यपश्चिमेनचरुमानीयाज्यस्योत्तरतोनिदध्यात्ततःआज्येप्रोक्षणीवदुत्पवनं अवेक्ष्य
सत्यपद्रव्येतन्निरसनं ततःपूर्ववत्प्रोक्षण्युत्पवनंततउत्थायोपयमनकुशानादायप्रजा ॥ ३ ॥
पतिंमनसाध्यात्वातूष्णीमग्नौक्षिपेत् समिधःघृताक्ताः अथोपविश्यसपवित्रप्रोक्षणी

For Private and Personal Use Only

जलेनाग्निंप्रदक्षिणक्रमेणपर्युक्ष्य प्रणीतापात्रेपवित्रेधृत्वा ब्रह्मणान्वारब्धः पातितद
क्षिणजानुर्जुहुयात्ततआहुतिचतुष्टयेप्रत्याहुत्यनंतरंहुतशेषस्यघृतस्यप्रोक्षणीपात्रे
प्रक्षेपःततःसमिद्धतमेग्नौ ॐप्रजापतयेस्वाहाइदंप्रजापतये० इतिमनसा ॐइंद्रायस्वा
हा इदमिंद्राय० इत्याघारौ ॐ अग्नयेस्वाहा इदमग्नये० ॐ सोमायस्वाहा इदंसोमा
य० इत्याज्यभागौ ततोऽन्वारब्धस्थालीपाकेनहोमः ॐप्रजापतयेस्वाहा इदंप्रजापत
ये० इतिमनसा ततोनन्वारब्धोजुहुयात् तत्तदाहुत्यनंतरंस्रुवावस्थितहुतशेषस्यप्रोक्ष
ण्यांप्रक्षेपःतत्रैवाज्यस्थालीपाकाभ्यांस्विष्टकृद्धोमः ॐअग्नयेस्विष्टकृतेस्वाहाइदमग्न
येस्विष्टकृते० ॐभूःस्वाहा इदमग्नयेनमम ॐभुवःस्वाहा इदंवायवे० ॐस्वःस्वाहा इदं
सूर्याय० एतामहाव्याहृतयः ॐ त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणा
भ्यां० ॐ सत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउशसोव्युष्टौ अवयक्ष्वनोवरुणꣳ
रराणोव्वीहिम्रडीकꣳसुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां० ॐ अयाश्चाग्नेस्यन
भिशस्तिपाश्चसत्यमित्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषज ꣳ स्वाहा इ
दमग्नये० ॐ येतेशतंवरुणयेसहस्त्रंयज्ञियाःपाशाविततामहांतः तेभिर्नोअद्यसवितो
तविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योम
रुद्भयःस्वर्केभ्यश्चनमम ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय अथा
वयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहाइदंवरुणाय०इतिसर्वप्रायश्चित्तम्॥
ॐ प्रजापतयेस्वाहा इदंप्रजापतये०इतिप्राजापत्यम् ॥ ॥ अथसंस्त्रावप्राशनम् ॥

॥ ४ ॥

For Private and Personal Use Only

॥ ततः आचम्य ॐ अद्यसीमंतोन्नयनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्र
तिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायाऽमुकशर्मणेब्राह्मणायब्रह्मणेदक्षि
णांतुभ्यमहंसंप्रददे ॐस्वस्तीतिप्रतिवचनम्॥ ततोब्रह्मग्रंथिविमोकः ततः ॐसुमित्रिया
नआपओषधयःसंतु इतिपवित्राभ्यांप्रणीताजलेनशिरःसंमृज्य ॐदुर्मित्रियास्तस्मै
संतुयोस्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांप्रणीतान्युब्जीकरणम्॥ ततस्तरणक्रमेणब
र्हिरुत्थाप्याज्येनाभिघार्य ॐ देवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवय
ज्ञꣳस्वाहाव्वातेधाःस्वाहा इतिमंत्रेणबर्हिर्होमः ततःपश्चादग्नेर्वधूमहतवाससीपरिधा
प्यमृद्वासनेउपवेशयेत् ततस्त्रिश्वेतशल्लकीकंटकाश्वत्थशंकुपीततंतुतर्कुदर्भपिंजूली
त्रितयोदुम्बरफलयुग्मान्वितप्रादेशमितशाखाभिर्वर्तुलीकृत्यसीमंतमूर्द्धनिविनयति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ॐ भूर्भुवःस्वःविनयामिइतिमंत्रेणासकृत् ॐ भूर्विनयामि ॐ भुवःविनयामि ॐ स्वर्वि
नयामि इतिमंत्रेणवारत्रयं ततःउदुंबरफलयुग्मान्वितशल्लकीकंटकादिपंचकंवधूसी
मंतदक्षिणतोवेणीकृत्वापतिर्बध्नाति ॐ अयमूर्जावतोवृक्षउर्जीवफलिनीभवइति
मंत्रेण ततः उदुंबरफलादिसमन्वितसूत्रदोरकंवधूग्रीवायांअनेनैवक्रमेणवाआचारा
द्बध्नीयात् ततोबिल्वादिसमन्वितवाराष्टतयेनस्नपनं ॥ततःफलपुष्पादिकंनूतनवस्त्रेणव
ध्वाप्रतीक्ष्यधर्तव्यं प्रतिस्नपनेस्वामिपठनीयोमंत्रः ॐ अयमूर्जैतिराजानःसंगायेता
मितिप्रैषानंतरंसोमएवनोराजेमामानुषीःप्रजाः अविमुक्तचक्रआसीरंस्तीरेतुभ्यम
सौश्रीअमुकदेवीइतिगाथांवीणागाथिनौगायेतांअन्योवावीरतरःततोयाग्रामसन्नि
हितनदीतस्यानामगृह्णीयात् ततउत्थाय वधूदक्षिणकरेणस्रुवस्पृष्टेनफलपुष्पसमन्वि





For Private and Personal Use Only

तघृतेन ॐ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं॥कविंःसम्राजमति
थिंजनानामासन्नापात्रंजनयंतदेवाःस्वाहाइतिमंत्रेण ॐ पूर्णादर्विपरापतसुपूर्णापु
नरापत वस्नेवविक्रीणावहाइषमूर्जंःशतक्रतोस्वाहेत्यनेनपूर्णाहुतिंदत्वोपविश्यस्रुवे
णभस्मानीयदक्षिणकरानामिकाग्रगृहीतभस्मना ॐ त्र्यायुषंजमदग्नेरितिललाटे ॐ
कश्यपस्यत्र्यायुषमितिग्रीवायां ॐ यद्देवेषुत्र्यायुषमितिदक्षिणबाहुमूले ॐ तन्नोअस्तु
त्र्यायुषमितिहृदि इतित्र्यायुषंकुर्यात् अनेनैवक्रमेणवध्वाअपित्र्यायुषंकुर्यात्तत्रतत्ते
अस्तुत्र्यायुषंइतिविशेषः ततोब्राह्मणभोजनम् ॥ इतिसीमंतकर्म ॥ ३ ॥ अथजात
कर्म ॥ तत्रप्रथमंशूलवतीमद्भिःपरिषिंचति ॐ एजतुदशमास्योगर्भोजरायुणासह
यथायंवायुरेजतियथासमुद्रएजति एवायंदशमास्योअस्रज्जरायुणासह इतिमंत्रेण

ततोवधूसमीपेपतिर्जपति ॐअवैतुपृश्निशेवलःशुनेजराय्वत्तवेनैवमाःसेनपीवरीं
नकस्मिंश्चनायतनमवजरायुपद्यतामिति ततःपुत्रेजातेनाभिवर्द्धनीयात्प्राकृकृताभ्यु
दयिकःकुमारंदक्षिणकरस्यानामिकयास्वर्णांतर्हितयामधुघृतेएकीकृत्यघृतमेववाप्रा
शयति ॐभूस्त्वयिदधामि ॐभुवस्त्वयिदधामि ॐस्वस्त्वयिदधामि ॐभूर्भुवःस्वः
सर्वंत्वयिदधामिइतिमंत्रेण॥एतच्चमेधाजननं ॥ततःकुमारस्यदक्षिणकर्णेनाभ्यांवा
मुखंदत्त्वाॐअग्निरायुष्मान्सवनस्पतिभिरायुष्माँस्तेनत्वायुषायुष्मंतंकरोमि १ ॐ
सोमआयुष्मान्सओषधीभिरायुष्माँस्तेनत्वायुषायुष्मंतंकरोमि २ ॐब्रह्मायुष्मत्तद्ब्रा
ह्मणैरायुष्मत्तेनत्वायुषायुष्मंतंकरोमि ३ ॐ देवाआयुष्मंतस्तेऽमृतेनायुष्मंतस्तेनत्वा
युषायुष्मंतंकरोमि ४ ॐ ऋषयआयुष्मंतस्तेव्रतैरायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ५



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐपितरआयुष्मंतस्तेस्वधाभिरायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ६ ॐ यज्ञआयु
ष्मान्त्सदक्षिणाभिरायुष्माँस्तेनत्वायुषायुष्मंतंकरोमि७ॐ समुद्रआयुष्मान्त्सस्त्रवं
तीभिरायुष्माँस्तेनत्वायुषायुष्मंतंकरोमि ८ इतित्रिर्जपित्वा ॐत्र्यायुषजमदग्नेःक
श्यपस्यत्र्यायुषंयद्देवेषुत्र्यायुषं तन्नोअस्तुत्र्यायुषं इतित्रिर्जपित्वा अथतस्यदीर्घमा
युःकामयमानःपुत्रमभिस्पृशन्वाग्जपतिसचायं ॐदिवस्परिप्रथमंजज्ञेअग्निरस्य
द्वितीयंपरिजातवेदाःतृतीयमप्सुनृमणाअजस्रमिंधानएनंजरतेस्वाधीः १ ॐविद्मा
तेअग्नेत्रधात्रयाणिविद्मातेधामविभृतापुरुत्रा विद्मातेनामपरमंगुहायद्विद्मातमुत्सं
यतआजगंथ२ॐसमुद्रेत्वानृमणाअप्स्वंतर्नृचक्षाईधेदिवोअग्नऊधनृतृतीयेत्वारज
सितस्थिवांसमपामुपस्थमेहिषाअवर्द्धन् ३ ॐअक्रंदद्ग्निःस्तनयन्निवद्योःक्षामारे

For Private and Personal Use Only

रिहद्वीरुधःसमंजन् सद्योजज्ञानोव्विहीमिद्धोअख्यदारोदसीभानुनाभात्यंतः ॥ ॐ
श्रीणामुदारोवरुणोरयीणांमनीषाणांप्रार्पणःसोमगोपाः ॥ वसुःसूनुःसहसोअप्सुरा
॥ ७ ॥ जाविभात्यग्रउषसामिधानः ५ ॐविश्वस्यकेतुर्भुवनस्यगर्भआरोदसीआपृणाज्जा
यमानःवीडुंचिदद्रिमभिनत्परायंजनायदग्निमयजंतपंच ६ ॐउशिक्पावकोअरतिः
सुमेधामर्त्तेष्वग्निरमृतोनिधायि इयर्तिधूममरुषंभरिभ्रदुच्छुक्रेणशोचिषाद्यामिनक्ष
न् ७ॐदृशानोरुक्मउर्व्याव्यद्यौदुर्मर्षमायुःश्रियेरुचानः अग्निरमृतोअभवद्वयोभिर्य
देनंद्यौरजनयत्सुरेताः ८ॐयस्ते अद्यकृणवद्भद्रशोचेपूपंदेवघृतवंतमग्ने प्रतन्नयप्रत
रंवस्योअच्छाभिसुम्नंदेवभक्तंयविष्ठ ९ ॐआतंभजसौश्रवसेष्वग्नउक्थउक्थआभ ॥ ७ ॥
जशस्यमाने प्रियःसूर्येप्रियोअग्नाभवात्युज्जातेनभिनदद्दुज्जनित्वै १० ॐत्वामग्ने

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यजमाना अनुघून्विश्वाव्वसुदधिरेवार्याणित्वयासहद्रविणमिच्छमानाव्रजंगोमंत
मुशिजोविवव्रुः ११ ततःकुमारंप्रतिदिशमेकैकंब्राह्मणंमध्येपंचममूर्ध्वमवेक्षमाण
मवस्थाप्यतमुद्दिश्यइममनुप्राणितेतिपिताब्रूयात्॥ ततस्तेषुप्राणेतिपूर्वोव्यानेतिदक्षि
णोऽपानेति अपरउदानेतिउत्तरउपरिष्टादवेक्ष्यमाणःसमानेतिपंचमोब्रूयात् एषामसं
भवेस्वयमेवतत्रतत्रोपविश्यतथैवब्रूयात् अथकुमारस्यजन्मभूमिमभिमंत्रयेत् ॐवे
दतेभूमिहृदयंदिविचंद्रमसिश्रितम् वेदाहंतन्मांतद्विद्यात्पश्येमशरदःशतंजीवेमशरदः
शतंशृणुयामशरदःशतमित्यनेन अथकुमारमभिमृशतिअश्माभवपरशुर्भवहि
रण्यमश्रुतंभव आत्मावैपुत्रनामासित्वंजीवशरदःशतमित्यनेन तत्रकुमारमातरम
भिमंत्रयेत् इडासिमैत्रावरुणीवीरेवीरमजीजनथाः सात्वंवीरवतीभवयास्मान्वीरव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तोकरत्इत्यनेन ततःकुमारनाभिवर्द्धनेकृतेतस्यादक्षिणस्तनंप्रक्ष्याल्यकुमारायप्रय
च्छति ॐइमंस्तनमूर्जस्वंतंधयापांप्रपीनमग्नेशरिरस्यमध्येउत्संजुषस्वमधुमंतमर्व
न्त्समुद्रियंसदनमाविशस्वइतिमंत्रेण ततोवामस्तनंप्रक्षाल्यप्रयच्छति ॐइमंस्त
नमित्यादि यस्तेस्तनःशशयोयोमयोभूर्योरत्नधावसुविद्यःसुदत्रः येनविश्वापुष्यसि
वार्याणिसरस्वतितमिहधातवेकःइतिमंत्राभ्यां ततःप्रसवित्रीशयनीयमस्तकोपरिभू
मौवारिपूर्णभाजनंनिदध्यात् अपोदेवेषुजागृथयथादेवेषुजागृथ एवमस्यांसूतिका
यांसपुत्रिकायांजागृथेत्यनेनमंत्रेण तच्चसूतिकोत्थापनपर्यंतंतत्रैवधर्तव्यं ततःसूति
कागृहद्वारप्रवेशेपंचभूसंस्कारान्कृत्वाग्नेरुपसमाधानं सचाग्निरुत्थानदिनपर्यंतंत
त्रैवधर्तव्यः तत्रचाग्नौसंध्ययोःफलीकरणांस्तंडुलांस्तन्मिश्रान्सर्षपान्दशदिनानिपि



For Private and Personal Use Only

ता अन्योवाब्राह्मणोनित्यंहस्तेनजुहोति तत्रप्रथमाहुतौमंत्रः ॐशंडामर्काउपवीरः
शौंडिकेयउलूखलः मलिम्लुचोद्रोणासश्च्यवनोनश्यतादितःस्वाहा इदंशंडामर्का
भ्यामुपवीरायमलिम्लुचायद्रोणेभ्यश्च्यवनाय० द्वितीयाहुतौ ॐआलिखन्ननिमिषः
किंवदंतउपश्रुतिर्हर्यक्षः कुंभीशत्रुःपात्रपाणिर्नृमणिर्हंत्रीमुखः सर्षपारुणश्च्यवनोन
श्यतादितःस्वाहा इदमालिखतेऽनिमिषायकिंवदद्भ्यउपश्रुतयेहर्यक्षायकुंभीशत्रवेपा
त्रपाणयेनृमणयेहंत्रीमुखायसर्षपायारुणाय० अथयदिदशाहाभ्यंतरेकुमारग्रहोबा
लमाविशेत्तेनाविष्टोननामयतिनरोदितिनहृष्यतिनतुष्यतिचतदेतन्नैमित्तिकंकर्तव्यं
तदातंबालकंजालेनप्रच्छाद्य उत्तरीयेणवाससाअंकमादायतंबालंपिताजपति कू
कुरस्तुकूर्कुरःकूर्कुरोबालबंधनःचेच्चेच्छुनकसृजनमस्तेअस्तुसीसरोलपेतापव्हरत्सत्यं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्तेदेवावरमदद्दुःसत्वंकुमारमेववावृणीथाः चेच्चेच्छुनकसृजनमस्तेअस्तुसीसरोल
पेतापव्हरसत्यंयत्तेसरमामातासीसरःपिताश्यामशबलौभ्रातरौ चेच्चेच्छुनकसृजन
मस्तेअस्तुसीसरोलपेतापव्हरेतिजपः ननामयतिनरोदितिनहृष्यतिनग्लायति यत्र
वयंवदामोयत्रचाभिमृशामसि इत्यभिमृशति ॥ इतिजातकर्म ॥ ४ ॥ ॥ ॥
अथनामकर्म ॥ अथदशमेहनिसूतिकांचोत्थाप्यैकादशेहनिविहितदिनांतरेवापिता
नामकुर्यात् तत्रप्रथमंमातृपूजाभ्युदयिकादिकृत्वाब्राह्मणान्भोजयेत् कुमारंसंस्ना
प्यअहतवासःपरिधाप्य कृतस्वस्त्ययनंप्राङ्मुखंदक्षिणकर्णेअमुकशर्मासीतित्रिः
श्रावयति अथआयुर्वेदात्मंत्रःॐअंगादंगात्संभवसिहृदयादधिजायसे ॥ आत्मावै
पुत्रनामासिसजीवशरदःशतम्॥नामद्व्यक्षरंचतुरक्षरंसुखोद्यंशर्मांतंब्राह्मणस्य वर्मां



For Private and Personal Use Only

तंक्षत्रियस्य गुप्तांतंवैश्यस्य दासांतंशूद्रस्य ॥ इतिनामकर्म ॥ ५ ॥ ॥ ॥
अथनिष्क्रमणम् ॥ तत्रचतुर्थेमासिचंद्रतारानुकूलेदिनेस्नातमलंकृतंशिशुंगृहाद्बहि
रानीयपितान्योवाब्राह्मणः सूर्यमुदीक्ष्यति ॐ तच्चक्षुरित्यादिमंत्रेण तत्रफलपुष्पा
न्वितपयसाभास्करस्यअर्घोदेयः ॥ इतिनिष्क्रमणम् ॥ ६ ॥ ॥ ॥ ॥
अथान्नप्राशनम्॥तत्रषष्ठेमासिचंद्रतारानुकूलशुभदिनेस्नातःशुचिराचांतः शुक्लद्विवा
साःपितासूतिकागृहएवकुशकंडिकांकुर्यात्तत्रकुशैर्हस्तपरिमितचतुरस्रभूमिंपरिसमु
ह्यतानैशान्यांनिक्षिप्य गोमयोदकेनोपलिप्यस्फ्येनस्रुवेणवाप्रादेशमात्रमुत्तरोत्तर
क्रमेणप्रागग्रंत्रिरुल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यांमृदंसमुद्धृत्यवारिणातंदे
शमभ्युक्ष्य कांस्यपात्रस्थंवह्निंप्रत्यङ्मुखमुपसमाधायँॐअद्यकर्तव्यान्नप्राशनहो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिःपुष्प
चंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणेइतिब्रह्माणंवृणुयात्ओंवृतोऽस्मीतिप्रतिवच
नंॐयथाविहितंकर्मकुर्वितियजमानेनोक्तेॐकरवाणीतितेनोक्ते अग्नेर्दक्षिणतःशुद्ध
मासनंनिधायतदुपरिप्रागग्रान्कुशानास्तीर्यअग्निंप्रदक्षिणंकारयित्वाब्रह्माणमुदङ्
मुखंतत्रोपवेश्यास्मिन्नन्नप्राशनहोमकर्मणित्वम्मेब्रह्माभवेत्यभिधाय ॐभवानीति
तेनोक्तेप्रणीतापात्रंपुरतःकृत्वावारिणापरिपूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्याग्ने
रुत्तरतोनिदध्यात् ततःपरिस्तरणंबर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतंब्रह्मणोऽग्नि
पर्यंतंनैर्ऋत्याद्वायव्यांतंअग्नितःप्रणीतापर्यंतम् ततोऽग्नेरुत्तरतः पश्चिमदिशिपवित्रच्छे
दनार्थंकुशत्रयंपवित्रकरणार्थंसाग्रमनंतर्गर्भितकुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्था



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लीचरुस्थाली संमार्जनकुशाःउपयमनकुशाःप्रादेशमितपलाशसमिधस्तिस्रःस्रुवः
आज्यं षट्पंचाशदुत्तरयजमानमुष्टिशतद्वयावच्छिन्नतंडुलपूर्णपात्रं चर्वर्थास्तंडुला
एतानिपवित्रच्छेदनकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयानिततःपवित्रच्छेदनकुशै
र्यजमानप्रादेशमितपवित्रच्छेदनंसपवित्रकरेणप्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय
द्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रेपवित्रेगृहीत्वात्रिरुत्पवनं ततःप्रोक्षणीपात्रंसव्य
हस्तेनगृहीत्वादक्षिणानामिकांगुष्ठाभ्यांपवित्रेगृहीत्वात्रिरुद्दिंगनं ततःप्रणीतोदकेन
प्रोक्षणीपात्रमभ्युक्ष्यप्रोक्षणीजलेनासादितवस्तुसेचनम् अग्निप्रणीतयोर्मध्येप्रोक्ष
णीपात्रंनिदध्यात् ततःआज्यस्थाल्यामाज्यंनिरुप्यप्रणीतोदकेनतंडुलान्प्रक्षाल्य च
रुपात्रेप्रणीतोदकंदत्त्वातत्रतंडुलान्प्रक्षिप्य स्वयंचरुंगृहीत्वा ब्रह्माचाज्यवह्नावुत्तर

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तश्चरुंदक्षिणतः आज्यंनिदध्यात् ततःसिद्धेचरौतृणादिप्रज्वाल्यउभयोरुपरिप्रदक्षि
णंभ्रामयित्वावह्नौतत्प्रक्षेपः ततस्त्रिःस्रुवप्रतपनं समार्जनकुशानामग्रैरंतरतोमूलैर्बा
ह्यतःस्रुवंसंमृज्य प्रणीतोदकेनाभ्युक्ष्यपुनस्त्रिःप्रतप्यदक्षिणतोनिदध्यात् ततआज्य
मग्नितश्चरोः पूर्वेणानीयाग्रेधृत्वाआज्यपश्चिमेनचरुमानीयाज्यस्योत्तरतोनिदध्यात्
ततआज्यस्यप्रोक्षणीवत्त्रिरुत्पवनं अवेक्ष्यसत्यपद्रव्येतन्निरसनं ततःप्रोक्षण्युत्पव
नं ततउत्थायउपयमनकुशान्वामहस्तेकृत्वा प्रजापतिंमनसाध्यात्वातूष्णीमग्नौघृता
क्तःसमिधस्तिस्रःप्रक्षिपेत् ततउपविश्यसपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणाग्निंप
र्युक्ष्य प्रणीतापात्रेपवित्रेनिधाय ब्रह्मणान्वारब्धःपातितदक्षिणजानुःसमिद्धतमेऽग्नौ
जुहुयात् तत्रप्रथमाहुतिचतुष्टयेतत्तदाहुत्यनंतरंस्रुवावस्थितहुतशेषस्यप्रोक्षणीपात्रे ॥११॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रक्षेपः ॐप्रजापतयेस्वाहा इदंप्रजापतये०इतिमनसा ॐइंद्रायस्वाहा इदमिंद्राय०
इत्याघारौ ॐअग्नयेस्वाहा इदमग्नये०ॐसोमायस्वाहा इदंसोमाय ० इत्याज्यभागौ
ततोनन्वारब्धेनासाधारणासाधारणाहुतिद्वयम्॥तत्रप्रथमाहुतिमंत्रः॥ ॐदेवींवाच
मजनयंतदेवास्तांविश्वरूपाःपशवोवदंति सानोमंद्रेषमूर्जंदुहानाधेनुवागस्मानुपसु
ष्टुतैतु०इदंवाचे०॥द्वितीयाहुतिस्तु॥ ॐदेवींवाचमित्यादिमंत्रःॐवाजोनोअद्यप्रसु
वातिदानंवाजोदेवाःऋतुभिः कल्पयाति वाजोहिमासर्ववीरंजजानविश्वाअशा
वाजपतिर्जयेयःस्वाहा इदंवाचेवाजाय०इतिमंत्राभ्यां॥ ततःस्थालीपाकेनाहुतिच
तुष्टयं॥ॐप्राणेनान्नमशीयस्वाहाइदंप्राणाय. ॐ अपानेनगंधमशीयस्वाहाइदमपा
नाय०ॐचक्षुषारूपाण्यशीयस्वाहाइदंचक्षुषे ० ॐश्रोत्रेणयशोऽशीयस्वाहाइदंश्रो

For Private and Personal Use Only

त्राय॥ततोब्रह्मणान्वारब्धकर्तृकोहोमः तत्रतत्तदाहुत्यनंतरंस्रुवावस्थितहुतशेषद्रव्य
स्यप्रोक्षणीपात्रेप्रक्षेपःतत्रैवाज्यस्थालीपाकाभ्यांस्विष्टकृतं ॐअग्नयेस्विष्टकृतेस्वा
हाइदमग्नयेस्विष्टकृते०ततआज्येनॐभूःस्वाहाइदमग्नये. ॐभुवःस्वहाइदंवायवेन०
ॐस्वःस्वाहाइदंसूर्यायन०एतामहाव्याहृतयः ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहे
डोअवयासिसीष्ठाःयजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा
इदमग्नीवरुणाभ्यां० ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्व
नोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधिस्वाहाइदमग्नीवरुणाभ्यां० ॐअयाश्चा
ग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वा ॥ १२ ॥
हा इदमग्नये० ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहांतः तेभिर्नोअद्यसवि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्य
ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रयाथ अथावयमादित्यव्रतेतवाना
गसोअदितयेस्यामस्वाहा इदंवरुणाय० इतिसर्वप्रायश्चित्तं ॐप्रजापतयेस्वाहाइ
दंप्रजापतये०इतिमनसा इतिप्राजापत्यं अथसंस्रवप्राशनम् ततआचम्य ओम
द्यकृतैतदन्नप्राशनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्र
जापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसंप्रददे इति
दक्षिणांदद्यात् ॐस्वस्तीतिप्रतिवचनं ततःप्रणीताविमोकः ॐसुमित्रियानआपओष
धयःसंतुइतिपठित्वा पवित्राभ्यांप्रणीताजलमानीयतेनशिरःसंमृज्य ॐदुर्मित्रिया
स्तस्मैसंतु योस्मान्द्वेष्टियंचवयंद्विष्मःइत्यैशान्यांप्रणीतान्युब्जीकरणम्ततःस्तरणक्रे॰

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णबर्हिरुत्थाप्याज्येनाभिघार्यहस्तेनैवजुहुयात् ॐदेवागातुविदोगातुंवित्वागातुमित
मनसस्पतइमंदेवयज्ञंस्वाहाव्वातेधाःस्वाहा इतिबर्हिर्होमः ॥ अथसर्वान्कटुमधुर
लवणादिरसान्सर्वाणिचशाल्यादीन्यन्नानि यथासंभवमुद्धृत्यैकस्मिन्नुत्तमपात्रेकृ
त्वा कृतस्नानादिरलंकारादियुतोबालस्तूष्णीं ॐहंतइतिमंत्रेणवाअन्नपतेन्नस्यनोदे
ह्यनमीवस्यशुष्मिणःप्रप्रदातारंतारिषऊर्ज्जंन्नोधेहिद्विपदेचतुष्पदेइत्यनेनवाप्राशनी
यम् अथकुमारस्यवाक्प्रसरणकामेनभरद्वाजमांसेनअन्नाद्यकामेनकपिंजलमांसे
नमत्स्येनजवनकामस्य आयुःकामेनकृकलासमांसेनब्रह्मवर्चसकामेनआटिमांसं
सर्वफलकामेनकथितसर्वमांसंकपिंजलःकटुआगौरतित्तिरइतिकेचित् अलाभेपिष्ट
कमयानांभरद्वाजप्रभृतीनामेकदेशःप्राशयितव्यःततआचम्योत्थायफलमूलपुष्पस



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्वितघृतेनस्रुवंपरिपूर्य ॐ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं
कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाःस्वाहा इतिमंत्रेणपूर्णाहुतिं
दद्यात्॥ततउपविश्यभस्मानीयदक्षिणानामिकाग्रगृहीतभस्मना ॐत्र्यायुषंजमदग्ने
रितिललाटे ॐकश्यपस्यत्र्यायुषमितिग्रीवायां ॐयद्देवेषुत्र्यायुषमितिदक्षिणबाहुमू
ले ॐतन्नोअस्तुत्र्यायुषमितिहृदि अनेनैवक्रमेणकुमारललाटादावपितन्नोइत्यत्रत
त्तेअस्त्वितिविशेषःततोदूर्वाक्षतादिदानंब्राह्मणानांभोजनंच॥इत्यन्नप्राशनम्॥ ७॥

॥ अथचूडाकर्म ॥

॥तच्चपूर्णवर्षेतृतीयेवाअसंपूर्णेउपनीत्यासहवायथाचारंउदग
यनआपूर्यमाणपक्षे शुक्रास्तादिदोषरहितरिक्तादिदोषरहितसोमगुरुबुधशुक्रान्यत
मवारविहितनक्षत्रसमन्वितायांतिथौकृतनित्यक्रियोयजमानोमातृपूजाभ्युदयिका

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिकृत्वामंडपेपरिष्कृतभूमौकुशकंडिकामारभेत्तत्रक्रमःकुशहस्तमितांभूमिंपरिसमु
त्यतानैशान्यांपरित्यज्यगोमयोदकेनोपलिप्य स्रुवमूलेनप्रादेशमात्रंत्रिरुल्लिख्यउल्लि
खनक्रमेणानामिकांगुष्ठाभ्यामुद्धृत्यवारिणातंदेशमभ्युक्ष्यकांस्यपात्रेणाग्निमानीय
प्रत्यङ्मुखमग्नेरुपसमाधानंकुर्यात्ततोग्नेःपश्चिमतोयजमानदक्षिणदिशिस्नापितम
हतवासःपरिधाप्यकुमारमंकेनिधायमाताउपविशतिततःपुष्पचंदनतांबूलवासांस्या
दाय ॐअद्यकर्तव्यचूडाकरणहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगो
त्रममुकशर्माणंब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणेइतिब्रह्मा
णंवृणुयात्ॐवृतोस्मीतिप्रतिवचनम्ॐयथाविहितंकर्मकुर्वितियजमानेनोक्तेॐक
रवाणीतिप्रतिवचनम् ततोयजमानोऽग्नेर्दक्षिणतः शुद्धमासनंदत्वातदुपरिप्रागग्रान्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुशानास्तीर्याग्निंप्रदक्षिणंकारयित्वा अस्मिन्कर्मणित्वंमेब्रह्माभवेत्यभिधाय ॐभ
वानीतितेनोक्तेब्रह्माणमुङ्मुदखंतत्रोपवेश्यप्रणीतापात्रंपुरतः कृत्वावारिणापरिपूर्य
कुशैराच्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतःकुशोपरिनिदध्यात्ततःपरिस्तरणंबर्हि
षश्चतुर्थभागमादायाग्नेयादीशांनांतंब्रह्मणोऽग्निपर्यंतं नैर्ऋत्याद्वायाव्यांतं अग्नितःप्र
णीतापर्यंतंततोऽग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयं पवित्रकरणार्थंसा
ग्रमनंतर्गर्भितकुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थालीसंमार्जनकुशाः समिधस्तिस्रः
स्रुवः आज्यंषट्पंचाशदुत्तरयजमानमुष्टिशतद्वयावच्छिन्नतंडुलपूर्णपात्रं पवित्र
च्छेदनकुशानांपूर्वंपूर्वंदिशिक्रमेणासादनीयम् अमीषामुत्तरोत्तरतः साधारणवस्तू
न्युपकल्पनीयानि तत्रशीतोदकमुष्णोदकंघृतदधिनवनीतान्यतमस्यपिंडः त्रिश्वेत

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शल्लकीकंटकं साग्रसप्तविंशतिकुशपात्राणिलोहक्षुरःनापितः वृषभगोमयपिंडःअन्य
दप्याचारान्नलिनीदलादि ततःपवित्रच्छेदनकुशाः पवित्रेछित्वासपवित्रकरेणप्र
॥१५॥ णीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय द्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रेपवित्रेगृहीत्वा
त्रिरुत्प्लवनं ततः प्रोक्षणीपात्रंवामहस्तेकृत्वाऽनामिकांगुष्ठगृहीतपवित्राभ्यांप्रोक्षणी
जलंत्रिरुत्क्षिप्यप्रणीतोदकेनप्रोक्षणीपात्रमभ्युक्ष्यप्रोक्षणीजलेनासादितवस्तून्यभि
षिच्याग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिदध्यात् आज्यस्थाल्यामाज्यंकृत्वाधिश्रित्य
ज्वलत्तृणादिकमादायाज्यस्योपरिप्रदक्षिणंभ्रामयित्वावह्नौतत्क्षिपेत् ततस्त्रिःस्रुवः ॥१५॥
प्रतपनं संमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतःस्रुवंसंमृज्यप्रणीतोदकेनाभ्युक्ष्य पू
र्ववत्त्रिःप्रताप्यदक्षिणतोनिदध्यात् ततःअग्नितःप्रदक्षिणक्रमेणाज्यमवतार्याग्रतो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निदध्यात् ततःप्रोक्षणीवन्निराज्योत्पवनं अवेक्ष्य सत्यपद्रव्येतन्निरसनं पूर्ववत्प्रो
क्षण्युत्पवनं ततउत्थायउपयमनकुशानादायवामहस्तेकृत्वाप्रजापतिंमनसाध्यात्वा
तूष्णीमग्नौघृताक्ताःसमिधस्तिस्रःप्रक्षिपेत् ततउपविश्यसपवित्रप्रोक्षण्युदकेनप्रद
क्षिणक्रमेणाग्निंपर्युक्ष्यप्रणीतापात्रेपवित्रेकृत्वाब्रह्मणान्वारब्धःपातितदक्षिणजानुः
समिद्धतमेग्नौजुहुयात् तत्रप्रत्याहुत्यनंतरंस्रुवावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रे
प्रक्षेपः ॐ प्रजापतयेस्वाहा इदंप्रजापतये० १ इतिमनसा ॐ इंद्रायस्वाहा इदमिं
द्राय० १ इत्याघारौ ॐ अग्नयेस्वाहाइदमग्नये०३ॐ सोमायस्वाहाइदंसोमाय०४
इत्याज्यभागौ ॐ भूःस्वाहाइदमग्नये०५ॐ भुवःस्वादाइदंवायवे० ६ ॐ स्वःस्वा
हा इदंसूर्याय० ७ एतामहाव्याहृतयः ॐ त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोऽ

For Private and Personal Use Only

द०क० पद्ध०

अवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा
इदमग्नीवरुणाभ्यां० ८ ॐ सत्वन्नोअग्नेवमोभवोतिनेदिष्ठोअस्याउषसोव्युष्टौ अ
॥१६॥ वयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां० ९
ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि अयानोयज्ञंवहास्ययानोधे
हिभेषजꣳस्वाहा इदमग्नये० १० ॐ येतेशतंवरुणयेसहस्रंयज्ञियाःपाशावितता
महांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा इदंवरुणायसवि
त्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्च० ११ ॐउदुत्तमंवरुणपाशमस्मदवा
धमंविमध्यमꣳश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा इदं ॥१६॥
वरुणाय० १२ इतिसर्वप्रायश्चित्तं ॐ प्रजापतयेस्वाहा इदंप्रजापतये० १३इतिम

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नसा इतिप्राजापत्यम् ॐ अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते ० १४इतिस्विष्ट
कृत् अथसंस्रवप्राशनम् ततआचम्य ॐ अद्यामुष्यकुमारस्यकृतैतच्चूडाकरणहो
मकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगो
त्रायाऽमुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसंप्रददे इतिब्रह्मणेदक्षिणांतुद
द्यात् ॐस्वस्तीतिप्रतिवचनंततोब्रह्मग्रंथिविमोकः ततः ॐसुमित्रियानआपओषध
यः संतुइतिपवित्राभ्यांप्रणीताजलमानीयतेनशिरःसंमृज्य ॐदुर्मित्रियास्तस्मैसंतु
योस्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांप्रणीतान्युब्जीकरणं ततःस्तरणक्रमेणबर्हिरु
त्थाप्याज्येनाभिघार्य ॐदेवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञँ
स्वाहाव्वातेधाःस्वाहा इतिमंत्रेणबर्हिर्होमः अथशीतोदकमुष्णोदकेन ॐउष्णेन

For Private and Personal Use Only

वायउदकेनेत्यदितेकेशान्वपइतिमंत्रेणाभिषिच्यतक्रमिश्रितोदकेनवनीताद्यन्यतम
पिंडंतूष्णींप्रक्षिप्य दक्षिणपश्चिमोत्तरक्रमेणपूर्वदिशाबद्धकुमारकेशजूटिकात्रये
दक्षिणजूटिकां ॐसवित्राप्रसूतादेव्याआपउंदंतुतेतनुदीर्घायुत्वायवर्चसे इतिमंत्रं
पठित्वातेनैवमिश्रितवारिणाप्रक्षाल्य ततोदक्षिणभागस्थितजूटिकाभागत्रयंकुर्या
त् तत्रएकैकांजूटिकांप्रतिकुशपत्रत्रयसंयोजनंकुर्यात् शल्लकीकंटकेनतूष्णींविवर
णंकृत्वाभागत्रयंकुर्यात् ततःसप्तविंशतिकुशपत्रतः पत्रत्रयमानीयतत्केशमूलसंल
ग्नाग्रजूटिकाप्रथमभागमध्यांतरितंकुयात् ॐ ओषधेत्रायस्वधितेमैन हिँसीः शि
वोनामासिस्वधितिस्तेपितानमस्तेअस्तुमामाहिँसीःइतिमंत्रेणलोहक्षुरंगृहीत्वाॐ
निवर्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्याय इतिमंत्रेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जूटिकासंलग्नंकुर्यात् ततःकुशपत्रत्रयसहितांजूटिकांछिनत्ति ॐयेनावपत्सविता
क्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान् तेनब्रह्माणोवपतेदमस्यायुष्यंजरदष्टिर्यथासत्
इतिमंत्रेणपश्चिमजूटिकाछेदनंकुर्यात् ततस्तान्लूनकुशपत्रत्रयसहितान् अनडु
द्गोमयपिंडोपरिउत्तरस्यांनिदध्यात् अत्रैवपूर्वप्रक्षालितपरभागद्वयेकुशपत्रत्रितयां
तर्निधानादिच्छेदवर्जंसर्वंपूर्ववदेवच्छेदनंतूष्णीं ततःपश्चिमजूटिकायांपूर्ववत्तेनैवमं
त्रेणप्रक्षालनंतूष्णींशल्लकीकंटकेनभागत्रयकरणंकेशमूलसंलग्नाग्रेकेशांतरितमध्य
कुशपत्रत्रयधारणक्षरग्रहणतत्संयोजनानितत्तन्मंत्रेणैव तत्रप्रथमजूटिकाछेदनेमं
त्रः ॐत्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषं यद्देवेषुत्र्यायुषंतन्नोअस्तुत्र्यायुषम् इतिमंत्रे
णछित्त्वाततः पूर्ववद्गोमयपिंडोपरिनिदध्यात् तत्रावशिष्टभागद्वयेकुशपत्रत्रयंकेशां

For Private and Personal Use Only

०क० तर्न्निधानादिच्छेदनवर्जंसर्वंपूर्ववदेवच्छेदनंतूष्णीमेवलूनकुशपत्रत्रयकेशानांगोमय पद्ध०
पिंडोपरिधारणंच ततउत्तरभागजूटिकायांप्रक्षालनादिक्षुरसंयोजनांतेषुपूर्ववत्तत्त
॥१८॥ न्मंत्रंप्रयोज्यप्रथमभागजूटिकायांछेदनेमंत्रः ॐयेनभूरिश्चराद्दिवंज्योक्पश्चाद्धिसू
र्यं तेनतेवपामिब्रह्मणाजीवातवेजीवनायसुश्लोक्यायस्वस्तये ततः केशान्गोमय
पिंडोपरिनिदध्यात् ततोऽस्वशिष्टभागद्वयेकुशपत्रत्रयेकेशांतर्निधानादिच्छेदनवर्जंस
र्वंपूर्ववदेवच्छेदनंतूष्णीं गोमयपिंडोपरिधारणमपि ततःसमस्तशिरःप्रक्ष्याल्यत्रिःके
शोपरिक्षुरंप्रदक्षिणक्रमेणानुकेशान्भ्रमयति ॐयत्क्षुरेणमज्जयतासुपेशसाव
प्त्वावपतिकेशांश्छिंधिशिरोमास्यायुःप्रमोषीः इतिमंत्रेण ततस्ताभिरेवाद्भिः समस्तं ॥१८॥
शिरःप्रक्ष्याल्य ॐअक्षण्वन्परिवप इतिनापितायक्षुरंप्रयच्छती अथनापितःशिखांधृ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वा समस्तशिरोवपनंयथाकुलधर्मंकुर्यात् तांश्चकेशान्नूतनवस्त्रेणप्रतीक्ष्यमातादधि
भक्तदुग्धसमन्वितगोमयपिंडोपरिनिदध्यात् इतिसमाचारःपूर्ववत्पूर्णाहुतिः ॐमूर्धा
नंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निम् कविंःसम्राजमतिथिंजनानामा
सन्नापात्रंजनयंतदेवाःस्वाहा इतिमंत्रेणपूर्णाहुतिः ततउपविश्यस्रुवेणभस्मानीय द
क्षिणानामिकाग्रगृहीतभस्मनात्र्यायुषंकुर्यात् ॐत्र्यायुषंजमदग्नेरितिललाटे ॐक
श्यपस्यत्र्यायुषमितिग्रीवायां ॐयद्देवानांत्र्यायुषमितिदक्षिणबाहुमूले ॐतन्नोअ
स्तुत्र्यायुषमितिहृदि अनेनैवक्रमेणकुमारललाटादावपि तत्रतत्तेअस्तुइतिविशेषः
ततोदूर्वाक्षतादिग्रहणम् ततस्तान्केशान्सगोमयपिंडान्गोष्ठेसरित्तीरेवाअन्यस्मि
न्नुदकांतरेवानिदध्यात् ततआचाराद्गोज्यादिकम् ॥ ॥ इतिचूडाकरणम् ॥ ८ ॥

For Private and Personal Use Only

द०क० ॥ अथकर्णवेधः ॥ ॥ तत्रतृतीयेवर्षेपंचमेवापुष्येंदुचित्राहरिरेवत्यन्यतमनक्षत्रसम पद्ध०
न्वितरिक्तातिरिक्ततिथिपूर्वाह्णे पिताऽन्योवापूर्वाभिमुखोपविष्टः कुमारस्यमधुरंदत्त्वा
॥१९॥ ॐभद्रंकर्णेभिः शृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभि
र्व्यशेमदेवहितंयदायुः इतिमंत्रेणदक्षिणकर्णमभिमंत्र्य ॐ वक्ष्यंतीवेदागनीगंतिक
र्णंप्रियंसखायंपरिषस्वजाना योषेवशिंक्तेविततादिधन्वन्ज्याइयंसमनेपारयंती
इतिमंत्रेणवामकर्णमभिमंत्रयेत् ततोमध्यंवीक्ष्यनापितद्वारावेधयेत् तस्मिन्समये
मधुरादिदानमाचारात् ततोब्राह्मणभोजनम् ॥ इतिकर्णवेधः ॥ ९ ॥
श्रीगणेशायनमः ॥ अथोपनयनम् ॥ ॥ तत्रशुद्धसमयेरविगुरुचंद्रतारादिशुद्धौज ॥१९॥
न्मतोगर्भाष्टमेऽब्देवानुकूल्येषोडशसंवत्सराभ्यंतरेब्रह्मवर्चसकामस्यपंचमेऽप्युदग

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यनआपूर्यमाणपक्षेऽनध्यायषष्ठीरिक्ताद्यतिरिक्तनिथौरविगुरुशुक्रान्यतमवारेमध्या
ह्नाद्र्वाक्कुमारपित्राभ्युदयिकेकृतेतदभावेआचार्यैणैवकृते ब्राह्मणान्माणवकंच
भोजयित्वासशिखकृतक्षौरंस्नानानंतरंयथाशक्त्यलंकृत्वाबहिः शालायांतुषकेशश
र्करादिशून्यपरिष्कृतभूमौआचार्योऽग्निस्थापनंकुर्यात् तत्रहस्तमात्रपरिमितचतुरस्र
भूमिकुशकरणकसमूहनानंतरंगोमयोदकेनापलिप्य स्रुवमूलेनप्रागग्रप्रादेशमात्र
मुत्तरोत्तरक्रमेणत्रिरुल्लिख्यउल्लेखनक्रमेणाऽनामिकांगुष्ठाभ्यांमृदमुद्धृत्यजलेनाभ्यु
क्ष्य नवीनकांस्यपात्रेणाग्निमानीयस्वाभिमुखंनिदध्यात् ततःकुमारमाचार्यः शिष्य
द्वाराग्नेःपश्चाद्दक्षिणपार्श्वेऽवस्थापयति ततःकुमारंबद्धांजलिंसंबोधयति ॐ ब्रह्मच
र्यमागामितिब्रूहि इतिप्रैषानंतरं ॐ ब्रह्मचर्यमागामितिकुमारआह ततः ॐ ब्रह्मचा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्यसानीतिब्रूहीत्याचार्येणोक्ते ॐ ब्रह्मचार्यसानीतिकुमारआह अथमाणवकमा
चार्योवासःपरिधापयति तत्रआचार्यपठनीयोमंत्रः ॐ येनेंद्रायबृहस्पतिर्वासःपर्यद
धादमृतंतेनत्वापरिदधाम्यायुषेदीर्घायुत्वायबलायवर्चसे ततोमाणवकस्यद्विराचम
नम् अथमाणवकस्यवेष्टनत्रयेणतत्प्रवरग्रंथितांमेखलामाचार्योबध्नाति तत्रमाणव
कपठनीयोमंत्रः इयंदुरुक्तंपरिबाधमानावर्णंपवित्रंपुनतीमआगात् प्राणापानाभ्यां
बलमादधानास्वसादेवीसुभगामेखलेयं ॐ युवासुवासाःपरिवीतआगात्सउश्रेया
न्भवतिजायमानः तंधीरासःकवयउन्नयंतिस्वाध्योमनसादेवयंतइतिवा ततआचा
र्यश्ज्ञोपवीतसहितभांडाष्टतयंब्राह्मणेभ्योदत्त्वा तत्सदद्यामुकगोत्रःस्वकीयोपनयन
कर्मविषयकसत्संस्कारप्राप्त्यर्थं इदंभांडाष्टतयंसयज्ञोपवीतंसदक्षिणंयथानामेति त

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तोयज्ञोपवीतंपरिदधातिमाणवकः ॐ यज्ञोपवीतमितिमंत्रस्य परमेष्ठीऋषिर्लिंगो
क्तादेवतात्रिष्टुपूछंदोयज्ञोपवीतपरिधानेविनियोगः ॐयज्ञोपवीतंपरमंपवित्रंप्रजा
पतेर्यत्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजःइतिमंत्रेण
ततऐणेयमजिनंतूष्णींपरिधत्तेततोमाणवककेशपरिमितपालाशदंडमाचार्यस्तूष्णीं
तस्मैप्रयच्छति तंच योमेदंडइतिप्रजापतिर्ऋषिर्दंडोदेवता यजुर्दंडग्रहणेविनियोगः
ॐयोमेदंडःपरापतद्वैहायसोधिभूम्यां तमहंपुनराददआयुषेब्रह्मणेब्रह्मवर्चसाय इ
तिमंत्रेणमाणवकोगृह्णाति ततआचर्योवारिणास्वमंजलिंपूरयित्वा कुमारस्यांज
लिंतेनैवांजलिजलेनपूरयति ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन महेरणाय
चक्षसे ॐयोवःशिवतमोरसस्तस्यभाजयतेहनः उशतीरिवमातरः ॐ तस्माऽअरं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गमामवोयस्यक्षयायाजिन्वथ आपोजनयथाचनः इतिक्रग्भिः ततः सूर्यमुदीक्षस्वे
तिआचार्यप्रेषानंतरं ॐ तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् पश्येमशरदःशतंजी
॥२१॥ वेमशरदः शतँशृणुयामशरदःशतंप्रब्रवामशरदःशतमदीनाःस्यामशरदःशतंभूय
श्चशरदःशतात् इत्यनेनादित्यंपश्यति अथकुमारस्यदक्षिणांसंसहृदयंदक्षिणहस्तेन
स्पृशत्याचार्यः ॐममव्रतेतेहृदयंदधामि ममचित्तमनुचित्तंतेअस्तु ममवाचमेकम
नाजुषस्वबृहस्पतिस्त्वानियुनक्तुमह्यं इतिमंत्रेण ततःकुमारस्यदक्षिणहस्तंगृहीत्वातं
पृच्छति कोनामासि श्रीअमुकशर्माहंभोः इतिकुमारआह कस्यब्रह्मचार्यसीत्याचा ॥२१॥
र्यः भवतइतिकुमारआह पुनराचार्योभाषते ॐ इंद्रस्यब्रह्मचार्यस्यग्निराचार्यस्तवाह
माचार्यः श्रीअमुकशर्मन् अथमाणवकंबद्धांजलिंपूर्वादिदिक्षुप्रदक्षिणमुपस्थानं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कारयति अथाचार्योमाणवकं भूतेभ्यःपरिददाति तत्रआचार्यस्यमंत्रपाठः ॐ प्र
जापतयेत्वापरिददामीतिप्राच्यां ॐदेवायत्वासवित्रेपरिददामि इतिदक्षिणस्यांॐ
अद्भ्यस्त्वोषधीभ्यःपरिददामि इतिप्रतीच्यां ॐद्यावापृथिवीभ्यांत्वापरिददामि इति
उदीच्यां ॐ विश्वेभ्यस्त्वादेवेभ्यःपरिददामीत्यधः ॐ सर्वेभ्यस्त्वाभूतेभ्यःपरिददा
म्यरिष्टयैइत्यूर्ध्वं ततोग्निंप्रदक्षिणीकृत्य आचार्यःदक्षिणदिशिउपविशतिमाणवकः त
तः पुष्पचंदनतांबूलवासांस्यादाय ततः ॐ अद्यकर्तव्योपनयनहोमकर्मणिकृताकृ
तावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिः पुष्पचंदनतांबूल
वासोभिर्ब्रह्मत्वेनत्वामहंवृणे इतिब्रह्माणंवृणुयात् ॐ वृतोऽस्मीतिवचनम् पुष्पचं
दनतांबूलवस्त्राण्यादाय अद्यकर्तव्योपनयनकर्मणिहोतृत्वकर्मकर्तुममुकगोत्रममु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कशर्माणंब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्होतृत्वेनत्वामहंवृणे इतिहोतारंवृणु
यात् ॐ स्वस्तीतिप्रतिवचनं ॐ यथाविहितंकर्मकुर्वित्याचार्येणोक्तेॐकरवाणीति
 ब्राह्मणोवदेत् ततोऽग्नेर्दक्षिणतः शुद्धमासनंदत्त्वा तदुपरिप्रागग्रान्कुशानास्तीर्य ब्रा
ह्मणमग्निप्रदक्षिणंकारयित्वास्मिन्कर्मणित्वंमेब्रह्माभवेत्यभिधाय. भवानीतितेनोक्ते
तदुपरिब्राह्मणमुदङ्मुखमुपवेश्य ततः प्रणीतापात्रंपुरतःकृत्वावारिणापरिपूर्यकुशैरा
च्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतःकुशोपरिनिदध्यात् ततःपरिस्तरणंबर्हिषश्च
तुर्थभागमादायाग्नेयादीशानांतंब्रह्मणोऽग्निपर्यंतं नैर्ऋत्याद्वायव्यांतं अग्नितः प्रणीता
पर्यंतं ततोऽग्नेरुत्तरतः पश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयंपवित्रार्थंसाग्रमनंतर्गर्भं 
कुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली संमार्जनार्थंकुशाः उपयमनकुशाः समि

For Private and Personal Use Only

धस्तिस्त्रःस्रुवःआज्यंषट्पंचाशदुत्तराचार्यमुष्टिशतद्वयावच्छिन्नामतंडुलपूर्णपात्रं प
वित्रच्छेदनकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयं ततःपवित्रच्छेदनकुशैः पवित्रेछि
त्वासपवित्रकरेणप्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय अनामिकांगुष्ठाभ्यांगृहीतप
वित्राभ्यांतज्जलंकिंचिन्निरुत्क्षिप्यप्रणीतोदकेन प्रोक्षणींत्रिरभिषिच्य प्रोक्षणीजले
नासादितवस्तुसेचनंकृत्वाऽग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिदध्यात् आज्यस्थाल्या
माज्यनिर्वापः अधिश्रयणं ततः कुशंप्रज्वाल्याज्योपरिप्रदक्षिणंभ्रामयित्वावह्नौ
तत्प्रक्षिप्य स्रुवं त्रिः परितप्यसंमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतः स्रुवंसंमृज्यप्र
णीतोदकेनाभ्युक्ष्यपुनस्त्रिःप्रताप्य दक्षिणतोनिदध्यात् ततआज्यमग्नेरवतार्यत्रिः
प्रोक्षणीवदुत्पूयावेक्ष्यसत्यपद्रव्येतन्निरसनंकृत्वा पुनःप्रोक्षण्युत्पवनंततउत्थायो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पयमनकुशान्वामहस्तेकृत्वाप्रजापतिंमनसाध्यात्वा तूष्णींघृताक्तास्तिस्रःसमिधःप्र
क्षिपेत् उपविश्यसपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणाग्निंपर्युक्ष्य प्रणीतापात्रेपवि
त्रेनिधायपातितदक्षिणजानुर्ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौस्रुवेणाज्याहुतीर्जुहोति
तत्रतत्तदाहुत्यनंतरंस्रुवावस्थितघृतशेषस्यप्रोक्षणीपात्रेप्रक्षेपः ॐ प्रजापतयेस्वाहा
इदंप्रजापये० इतिमनसा ॐ इंद्रायस्वाहा इदमिंद्राय० इत्याघारौ ॐ अग्नयेस्वा
हा इदमग्नये० ॐ सोमायस्वाहा इदंसोमाय०इत्याज्यभागौ ॐ भूःस्वाहा इदमग्न
ये० ॐ भुवःस्वाहा इदंवायवे० ॐस्वःस्वाहा इदंसूर्याय०एतामहाव्याहृतयःॐत्व
न्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानो
विश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां० ॐसत्वन्नोअग्नेवमोभवो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणँरराणोवीहिम्रडीकँसुहवोनए
धिस्वाहा इदमग्नीवरुणाभ्यां० ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअ
सि अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहाइदमग्नये० ॐयेतेशतंवरुणयेसह
स्त्रंयज्ञियाः पाशाविततामहांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्व
र्काःस्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्च० ॐउदु
त्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय अथावयमादित्यव्रतेतवानगसो
अदितयेस्यामस्वाहा इदंवरुणाय० एताःसर्वंप्रायश्चित्तसंज्ञकाः ॐ प्रजापतयेस्वा
हा इदंप्रजापतये इतिमनसाप्राजापत्यं ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्ट
कृते० इतिस्विष्टकृद्धोमः ततःसंस्रवप्राशनम् आचमनंच ततोब्रह्मणेदक्षिणादान

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म् ॐ अद्यैतस्मिन्नुपनयनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपू
र्णपात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसं
प्रददे इतिदक्षिणांदद्यात् ॐ स्वस्तीतिप्रतिवचनम् ततोब्रह्मग्रंथिविमोकः ततः
ॐसुमित्रियानआपओषधयः संतु इतिपवित्राभ्यांजलमानीयतेनशिरःसंमृज्यॐ
दुर्मित्रियास्तस्मैसंतुयोऽस्मान्द्वेष्टियंचवयंद्विष्मःइत्यैश्यान्यांप्रणीतान्युब्जीकरणंततः
स्तरणक्रमेणबर्हिरुत्थाप्यघृतेनाभिघार्यहस्तेनैवजुहुयात् ॐ देवागातुविदोगातुवि
त्वागातुमित मनसस्पतइमंदेवयज्ञंस्वाहावातेधाःस्वाहा इतिबर्हिर्होमः ततआ
चार्यःकुमारस्यानुशासनंकरोति ॐब्रह्मचार्यसीत्याचार्यः ॐ असानीतिब्रह्मचारी
ॐअपोशानइत्याचार्यःॐअशानीतिकुमारआह ॐकर्मकुर्वित्याचाआर्यःॐकर



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाणीतिमाणवकः ॐमादिवासुषुप्स्वइत्याचार्यः नस्वपानीतिकुमारः ॐवाचंयच्छ
इत्याचार्यःॐयच्छानीतिकुमारः ॐसमिधमाधेहीत्याचार्यःॐआदधानीतिमाणव
कः ॐअपोशानेत्याचार्यःॐअशानीतिकुमारः अथाग्नेरुत्तरतः प्रत्यङ्मुखायोपवि
ष्टायाचार्यचरणोपसंग्रहणपूर्वकमुपसन्नायाचार्यसमीक्ष्यमाणायाचार्यः स्वयमपि
समीक्षितायास्मैनिवारितशंखतूर्यादिशब्दइष्टांशकेसावित्रीमन्वाह तत्रप्रथमावृत्तौ
ॐभूर्भुवःस्वःतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात्ॐपुनर्वारद्वयं
अत्रतुसहपाठोविशेषः अथमाणवकआचार्यदक्षिणदिशिअग्निपश्चिमोपविष्टोघृता
क्तशुष्कनिषिद्धेतरेंधनेनजुहुयात् ततः ॐअग्नेसुश्रवःसुश्रवसंमांकुरु ॐयथात्वमग्ने
सुश्रवाअसि ॐएवंमांसुश्रवःसौश्रवसंकुरु ॐयथात्वमग्नेदेवानांयज्ञस्यनिधिपा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





असि ॐ एवमहंमनुष्याणांवेदस्यनिधिपोभूयासं ततःप्रदक्षिणमग्निंवारिणापर्युक्ष्य
उत्थायस्वप्रादेशमितांघृताक्तपलाशसमिधमादाय ॐ अग्नयेसमिधमाहार्षंबृहतेजा
तवेदसे यथात्वमग्नेसमिधासमिध्यसएवमहमायुषामेधयावर्चसाप्रजयापशुभिर्ब्र
ह्मवर्चसेनसमिंधेजीवपुत्रोममाचार्योमेधाव्यहमसान्यनिराकरीष्णुर्यशस्वीतेजस्वी
ब्रह्मवर्चस्व्यन्नादोभूयाःस्वाहाइतिमंत्रेणजुहुयात्एवंसमिदंतरद्वयंजुहुयात् ॐ अग्ने
सुश्रवःसुश्रवसंमांकुरु ॐ यथात्वमग्नेसुश्रवःसुश्रवाअसि ॐ एवंमांसुश्रवःसौश्रवसंकु
रु ॐ यथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि ॐ एवमहंमनुष्याणांवेदस्यनिधिपोभू
यासं ततःप्रदक्षिणमग्निंपर्युक्ष्यतूष्णींपाणीप्रतप्यमुखंप्रतिमत्रांतेऽवम्हशति ॐ तनूपा
अग्नेऽसितन्वंमेपाहि ॐ आयुर्दाअग्नेस्यायुर्मेदेहि ॐ वर्चोदाअग्नेऽसिवर्चोमेदेहि ॐ अग्ने ॥२५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यन्मेतन्वाऊनं तन्मआपृण ॐमेधांमेदेवः सविताआदधातु ॐमेधांमेदेवीसरस्वती
आदधातुॐमेधामश्विनौदेवावाधत्तांपुष्करस्त्रजौ।ततःसर्वंगात्राक्षिषुदक्षिणपाणिना
स्पर्शःअत्रप्रत्येकंमंत्रःॐअंगानिचमआप्यायंतांइतिसर्वंगात्रालंभनेॐवाक्कमआ
प्यायतामितिमुखालंभने ॐप्राणश्चमआप्यायतामितिनासिकयोःॐचक्षुश्चमआ
प्यायतामितिचक्षुषोॐश्रोत्रंचमआप्यायतामितिश्रोत्रयोःॐयशोबलंचमआप्या
यतामितिमंत्रपाठमात्रं ततोदक्षिणकरानामिकाग्रगृहीतभस्मनाललाटेग्रीवायांद
क्षिणबाहुमूलेहृदिचत्र्यायुषंकुर्यात् तत्रयथासंख्येनमंत्रचतुष्टयम् ॐत्र्यायुषंजमद
ग्ने इतिललाटेॐकश्यपस्यत्र्यायुषम् इतिग्रीवायां ॐयद्देवेषुत्र्यायुषमृइतिदक्षिणबाहु
मूले ॐतन्नोअस्तुत्र्यायुषम् इतिहृदि ततोभ्यस्तपाणिभ्यांपृथिवींस्पृशन्नभिवादनं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




कुर्यात् तत्रप्रकारः ॐ अमुकगोत्रोऽहममुकप्रवरोऽहममुकशर्माहंभोवैश्वानरत्वामभि
वादये ततोनेनैवक्रमेणसंबोध्यवरुणमभिवाद्याचार्यंतथैवाभिवादयेत् ततः आयु
ष्मान्भवसौम्येत्याचार्योब्रूयात् ततोभिक्षापात्रमादायप्रथमंमातुः सकाशात् ॐ
भवतिभिक्षांमेदेहि इतिप्रार्थनानंतरंतद्दत्तांचादायाचार्यायनिवेदयेत् तथैवभिक्षांत
रंयाचेत ततआचार्येणभुंक्ष्वेत्यनुज्ञातोभिक्षांस्वीकुर्यात् ततःफलपुष्पचंदनघृतपूर्ण
स्रुवेणब्रह्मचारिदक्षिणकरस्पृष्टेनाचार्यःपूर्णाहुतिंदद्यात् तत्रमंत्रः ॐ मूर्धानंदिवोअ
रतिंपृथिव्यावैश्वानरमृतआजातमग्निम् कविंसम्राजमतिथिंजनानामासन्नापात्रं
जनयंतदेवाः स्वाहा इदमग्नये० ततःस्रुवेणभस्मानीयदक्षिणानामिकाग्रगृहीतभ
स्मना ॐ त्र्यायुषंजमदग्ने इतिललाटे ॐ कश्यपस्यत्र्यायुषम् इतिग्रीवायां ॐ यद्देवे



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षुत्र्यायुषम् इतिदक्षिणबाहुमूले ॐतन्नोअस्तुत्र्यायुषम् इतिहृदि इतित्र्यायुषंकुर्यात्
कुमारपक्षेतन्नोइत्यस्यस्थानेतत्तेइतिविशेषः अथक्षारलवणमधुमांसादिनिवृत्तिः उ
द्धृतजलस्नानदंडकृष्णाजिनधारणवृक्षारोहणविषमभूमिलंघननग्नस्त्रीनिरीक्षणस्त्री
संभोगव्यसनव्यावृत्तिरूपाब्रह्मचारिणोनियमाः तद्दिनेब्रह्मचारीवाग्यतोऽहःशेषंस्थि
तएवगमयेत् ततः सायंसंध्यांकृत्वातस्मिन्नेवाग्नौपूर्ववत्पर्युक्षणपरिसमूहनेकृत्वा
वाचंविसृजेत् परिसमूहनांतेशुष्कनिषिद्धेतरेंधनस्याग्नौप्रक्षेपः। ततः संध्यामुपास्यत्र
तिदिनंसायंप्रातरपिब्रह्मचारिणाकर्तव्या ॥ ॥ अथवेदारंभः॥तत्रकृतनित्यक्रियआ
चार्यःकुशैर्हस्तमात्रपरिमितांभूमिंपरिसमुह्यतान्कुशानैशान्यांपरित्यज्य गोमयो
दकेनोपलिप्यस्रुवमूलेनउत्तरोत्तरतःप्रागग्रप्रादेशमात्रंत्रिरुल्लिख्य उल्लेखनक्रमेणा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नामिकांगुष्ठाभ्यामुद्धृत्यजलेनाभ्युक्ष्य कांस्येनाग्निमानीयाभिमुखमुपसमाधाय पु
ष्पचंदनतांबूलवस्त्राण्यादाय ॐ अद्यकर्त्तव्यवेदारंभहोमकर्मणिकृताकृतावेक्षणरूप
ब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वे
नत्वामहंवृणे इतिब्राह्मणंवृणुयात् ॐवृतोऽस्मीतिप्रतिवचनं ॐयथाविहितंकर्मकु
र्वित्याचार्यः ॐकरवाणीतितेनोक्ते अग्नेर्दक्षिणतःशुद्धमासनंदत्त्वा तदुपरिप्रागग्रा
न्कुशानास्तीर्य ब्रह्माणमग्निप्रदक्षिणक्रमेणभ्रामयित्वा अस्मिन्कर्मणित्वंमेब्रह्मा
भवेत्यभिधाय ॐभवानीतितेनोक्ते ब्रह्माणमुदङ्मुखंतत्रोपवेश्य प्रणीतापात्रंपुरतः
कृत्वावारिणापरिपूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतः कुशोपरिनिद
ध्यात् ततःपरिस्तरणंबर्हिषश्चतुर्थभागमादाय आग्नेय्यादीशानांतंब्रह्मणोऽग्निपर्यंतं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैर्ऋत्याद्वायव्यातम् अग्नितःप्रणीतापर्यंतम् ततोऽग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेद
नार्थंकुशत्रयंपवित्रकरणार्थंसाग्रमनंतर्गर्भंकुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली
संमार्जनकुशाः उपयमनकुशाः समिधस्तिस्रःस्रुवः आज्यं पूर्णपात्रंपवित्रच्छेदनकु
शानांपूर्वंपूर्वंदिशिक्रमेणासादनीयं ततःपवित्रच्छेदनकुशैः पवित्रेछित्त्वासपवित्रक
रेणप्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय द्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रेपवित्रेगृ
हीत्वात्रिरुत्पवनंततःप्रोक्षणीपात्रंवामहस्तेगृहीत्वादक्षिणहस्तानामिकांगुष्ठाभ्यांत्रि
रुद्दिंगनमृततःप्रणीतोदकेनप्रोक्षणीपात्रमभ्युक्ष्यप्रोक्षणीजलेनयथासादितवस्तून्य
भिषिच्याऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रंनिदध्यात् ततआज्यस्थाल्यामाज्यंनिरुप्या
धिश्रयणम् ततः कुशंप्रज्वाल्याज्यस्याग्नेश्चोपरिप्रदक्षिणंभ्रामयित्वा अग्नौतत्प्रक्षेपः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्त्रिःस्रुवप्रतपनं संमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतः स्रुवंसंमृज्यप्रणीतोदके
नाभ्युक्ष्यपुनस्त्रिःप्रतप्यदक्षिणतोनिदध्यात्ततआज्यमग्निप्रदक्षिणंभ्रामयित्वाऽवता
र्यांग्रेनिदध्यात् ततःआज्यंप्रोक्षणीवदुत्पवनं अवेक्ष्यसत्यपद्रव्येतन्निरसनंततःप्रोक्ष
ण्युत्पवनं ततउत्थायोपयमनकुशानादाय प्रजापतिंमनसाध्यात्वा तूष्णीमग्नौघृता
क्ताःसमिधस्तिस्रःक्षिपेत् ततउपविश्यसपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणाग्निंपर्यु
क्ष्य प्रणीतापात्रेपवित्रेनिधाय ब्रह्मणान्वारब्धःपातितदक्षिणजानुःसमिद्धतमेऽग्नौजु
हुयात् तत्रप्रथमाहुतिचतुष्टयेनस्रुवावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपः ॐप्र
जापतयेस्वाहा इदंप्रजापतये० इतिमनसा ॐइंद्रायस्वाहा इदमिंद्राय०इत्याघारौ
ॐअग्नयेस्वाहा इदमग्नये० ॐसोमायस्वाहा इदंसोमाय०इत्याज्यभागौ ततःप्राक्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तोऽनन्वारब्धकर्तृकोहोमः ॐ अंतरिक्षायस्वाहा इदमंतरिक्षाय० ॐ वायवेस्वाहा इदं
वायवे० ॐ ब्रह्मणेस्वाहा इदंब्रह्मणे० ॐ छंदोभ्यःस्वाहा इदंछंदोभ्यः० एताःसामान्या
हुतयः ॐ प्रजापतयेस्वाहा इदंप्रजापतये० इतिमनसा ॐ देवेभ्यःस्वाहा इदंदेवेभ्यः०
ॐ ऋषिभ्यःस्वाहा इदंऋषिभ्यः० ॐ श्रद्धायैस्वाहा इदंश्रद्धायै० ॐ मेधायैस्वाहा इदं
मेधायै० ॐ सदसस्पतयेस्वाहा इदंसदसस्पतये० ॐ अनुमतयेस्वाहा इदमनुमत
ये ततोऽन्वारब्धकर्तृकोहोमः तत्तदाहुत्यनंतरंस्रुवावस्थितहुतशेषघृतस्यप्रोक्षणीपा
त्रेप्रक्षेपः ॐ भूःस्वाहा इदमग्नये० ॐ भुवःस्वाहा इदंवायवे० ॐ स्वःस्वाहा इदंसू
र्याय० एतामहाव्याहृतयः ॐ त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसी
ष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्यां० ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणं२र
राणोवीहिम्रडीकं२सुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां० ॐअयाश्चाग्नेस्यनभि
शस्तिपाश्चसत्वमित्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषजं२स्वाहा इदम
ग्नये० ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहांतः तेभिर्नोअद्यसवितोत
विष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योम
रुद्भ्यःस्वर्केभ्यश्च० ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमं२श्रथाय अथाव
वयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा इदंवरुणाय० इतिसर्वप्रायश्चित्त
संज्ञकाः ॐप्रजापतयेस्वाहा इदंप्रजापतये० इतिमनसा इतिप्राजापत्यं ॐअग्नये
स्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते० इतिस्विष्टकृद्धोमः ततःसंस्रवप्राशनम् ततआ



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चम्य ॐ अद्यकृतैतद्वेदारंभहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थं इदंपूर्ण
पात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसंप्र
ददेइतिदक्षिणांदद्यात् ॐस्वस्तीतिप्रतिवचनं ततोब्रह्मग्रंथिविमोकः ॐसुमित्रियान
आपओषधयःसंतुइतिपवित्राभ्यांप्रणीताजलमानीयतेनशिरःसंमृज्य ॐदुर्मित्रिया
स्तस्मैसंतु योऽस्मान्द्वेष्टि यंचवयंद्विष्मः इतिमंत्रेणऐशान्यांप्रणीतांन्युब्जीकुर्य्यात् तत
आस्तरणबर्हिरानीयघृतेनाभिघार्यक्रमेणहस्तेनैवजुहुयात् ॐदेवागातुविदोगातुंवि
त्वागातुमितमनसस्पतइमंदेवयज्ञं स्वाहावातेधाःस्वाहा इतिबर्हिर्होमः ततःकाश्मी
रगमनम् ततइष्टांशाकेवेदारंभंगुरुःकारयेत् तत्रक्रमः ॐभूर्भुवःस्वःतत्सवितुर्वरेण्यं
भर्गोदेवस्यधीमहिधियोयोनः प्रचोदयात् ॐइतिप्रणवांतंपठित्वापंक्तिनमस्कारंच

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारयित्वा ॐसमिधाग्निंदुवस्यतघृतैर्बोधयतातिथिम् आस्मिन्हव्याजुहोतन सुस
मिद्धायशोचिषे इतिकंडिकांतरंवाफक्किकांवापाठयेत् ततःसप्रणवंस्वस्तिवाचयित्वा
उत्थायफलपुष्पसमन्वितब्रह्मचारिदक्षिणकरस्पृष्टेनघृतपूर्णेनपूर्णाहुतिंदद्यात् ॐमू
र्द्धानंदिवोअरतिंपृक्षिव्यावैश्वानरमृतआजातमग्निं कविंसम्राजमतिथिंजनाना
मासन्नापात्रंजनयंतदेवाः इतिपूर्णाहुतिःततउपविश्यस्रुवेणभस्मानीयदक्षिणानामि
कागृहीतभस्मनात्र्यायुषंजमदग्नेरितिललाटेॐकश्यपस्यत्र्यायुषमितिग्रीवायांॐ
यद्देवेषुत्र्यायुषमितिदक्षिणबाहुमूलेॐतन्नोअस्तुत्र्यायुषमितिहृदिअनेनैवक्रमेणब्र
ह्मचारिललाटादावपितत्रतत्तेइतिविशेषः॥इतिवेदारंभः ॥ अथसमावर्तनं॥ तत्रशुभे
दिनेप्रह्वीभूयआचार्यस्नास्यामीतिकुमारआचार्यंभाषते तत्रस्नाहीत्याचार्यः ततोब्र



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह्मचारिणिआचार्यसन्निहितदक्षिणदिशिउपविष्टेकृतस्नानादिराचार्यः कुशैर्हस्तमा
त्रांभूमिंपरिसमुत्यतानैशान्यांपरित्यज्यगोमयोदकेनोपलिप्य स्रुवमूलेनोतरोत्तर
क्रमेणत्रिरुल्लिख्यउल्लेखनक्रमेणोद्धृत्यजलेनाभ्युक्ष्यकांस्येनाग्निमानीयप्रत्यङ्मुखं
निदध्यात् ततःपुष्पचंदनतांबूलवासांस्यादाय ॐअद्यामुकस्यकर्तव्यसमावर्तनहोम
कर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्म्माणंब्राह्मणमेभिः पुष्प
चंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणेवृतोऽस्मीतिप्रतिवचनंयथाविहितंकर्मकुर्वि
त्यभिधाय ॐकरवाणीतितेनोक्ते अग्नेर्दक्षिणतःशुद्धमासनंदत्त्वातदुपरिप्रागग्रान्
कुशानास्तीर्याऽस्मिन्कर्मणित्वंमेब्रह्माभवेत्यभिधाय ॐभवानीतितेनोक्ते ब्रह्माणमु
दङ्मुखंतत्रोपवेश्यततः प्रणीतापात्रंपुरतःकृत्वावारिणापरिपूर्यकुशैराच्छाद्यब्रह्मणो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुखमवलोक्याऽग्नेरुत्तरतःकुशोपरि निदध्यात् ततःपरिस्तरणं बर्हिषश्चतुर्थभागमादा
याग्नेयादीशान्त्यंतंब्रह्मणोऽग्निपर्य्यंतं नैर्ऋत्याद्वायव्यांतंअग्नितःप्रणीतापर्य्यंतं ततोऽग्ने
॥३१॥ रुत्तरतः पश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयम् पवित्रकरणार्थंसाग्रमनंतर्गर्भंकुश
पत्रद्वयंप्रोक्षणीपात्रंआज्यस्थालीसंमार्जनार्थंकुशाः उपयमनकुशाः समिधस्तिस्रः
स्रुवआज्यंपूर्वंपूर्वदिशिक्रमेणासादनीयं ततःपवित्रच्छेदनकुशैःपवित्रेछित्वासपवि
त्रकरेणप्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधायानामिकांगुष्ठाभ्यांपवित्रेगृहीत्वात्रिरुत्पू
यप्रोक्षणीपात्रंवामकरेणादायाऽनामिकांगुष्ठगृहीतपवित्राभ्यांतज्जलंकिंचित्त्रिः प्र ॥३१॥
क्षिप्य प्रणीतोदकेनप्रोक्षणीमभ्युक्ष्यप्रोक्षणीजलेन यथासादितवस्तून्यभिषिच्या
ग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिदध्यात् ततआज्यस्थाल्यामाज्यनिर्वापः अधिश्रय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णम् ततस्तृणंप्रज्वाल्याज्यस्याग्नेश्चोपरिप्रदक्षिणंभ्रामयित्वावह्नौतत्प्रक्षिप्य स्रुवं
त्रिःप्रतप्यसंमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतःस्रुवंसंमृज्यप्रणीतोदकेनाभ्युक्ष्य
पुनःप्रतप्यस्वस्यदक्षिणतोनिदध्यात् ततआज्यमग्निंप्रदक्षिणंभ्रामयित्वावतार्य्यत्रिः
प्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्येतन्निरसनंकृत्वापुनः पूर्ववत्प्रोक्षण्युत्पवनं ततउ
त्थायोपयमनकुशान्वामहस्तेकृत्वाप्रजापतिंमनसाध्यात्वा तूष्णीमग्नौघृताक्ताः स
मिधस्तिस्रःक्षिपेत् ततउपविश्यसपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणाग्निंपर्य्युक्ष्य प्र
णीतापात्रेपवित्रेनिधाय पातितदक्षिणजानुःसमिद्धतमेऽग्नौब्रह्मणान्वारब्धःस्रुवेणा
ज्याहुतीर्जुहुयात् तत्रप्रथमाहुतिचतुष्टये प्रत्याहुत्यनंतरंस्रुवावस्थितहुतशेषघृतस्य
प्रोक्षणीपात्रेप्रक्षेपः ॐप्रजापतयेस्वाहाइदंप्रजापतये॰इतिमनसा ॐइंद्रायस्वाहा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदमिंद्राय०इत्याघारौ ॐअग्नयेस्वाहा इदमग्नये० ॐसोमायस्वहा इदंसोमाय०
इत्याज्यभागौ ततोऽनन्वारब्धकर्तृकहोमः ॐअंतरिक्षायस्वाहा इदमंतरिक्षाय० ॐ
वायवेस्वाहा इदंवायवे० ॐब्रह्मणेस्वाहा इदंब्रह्मणे० ॐछंदोभ्यःस्वाहा इदंछंदो
भ्यः० ॐप्रजापतयेस्वाह इदंप्रजातये० इतिमनसा ॐदेवेभ्यः स्वाहा इदंदेवेभ्यः
ॐऋषिभ्यःस्वाहा इदंऋषिभ्य० ॐश्रद्धायैस्वाहा इदंश्रद्धायै० ॐमेधायैस्वाह इदं
मेधायै०ॐसदसस्पतयेस्वाहा इदंसदसस्पतये० ॐअनुमतयेस्वाहा इदमनुमतये०
ततोब्रह्मणान्वारब्धोजुहुयात् अत्राहुतिदशतयेतत्तदाहुत्यनंतरंस्नुवावस्थिताज्यस्य
प्रोक्षणीपात्रेप्रक्षेपः ॐभूःस्वाहा इदमग्नये० ॐभुवःस्वाहा इदंवायवे० ॐस्वःस्वाहा
इदंसूर्याय०एतामहाव्याहृतयः ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसी



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाँसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणँ रराणोवीहिमृडीकँसुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां० ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषजँस्वाहा इदमग्नये० ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशावितताममहांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा इंदवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्च० ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमँश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा इदंवरुणाय० इतिसर्वप्रायश्चित्तम् ॐप्रजापतयेस्वाहाइदंप्रजापतये०इतिमनसाइतिप्राजापत्यम् ॐअग्नयेस्विष्टकृतेस्वाहा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 इदमग्नयेस्विष्टकृते० इतिस्विष्टकृत् ततःसंस्रवप्राशनं ततआचम्य ॐअद्यकृतैतत्स 
मावर्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदै
 वतममुकगोत्रायामुकशर्म्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसंप्रददेइतिदक्षिणां
दद्यात् ॐस्वस्तीतिप्रतिवचनम् ततोब्रह्मग्रंथिविमोकः ततःपवित्राभ्यांप्रणीताजले
न ॐसुमित्रियानआपऔषधयस्संतु इतिमंत्रेणशिरःसंमृज्य ॐदुर्मित्रियास्तस्मैसं
तुयोस्मान्द्वेष्टियंचवयंद्विष्मःइतिमंत्रेणैशान्यांप्रणीतान्युब्जीकरणम् ततःस्तरणक्रमे
णबर्हिरानीयघृतेनाभिघार्यहस्तेनैवजुहुयात् ॐदेवागातुविदोगातुंवित्वागातुमि 
तमनसस्पतइमंदेवयज्ञ स्वाहाव्वातेधाःस्वाहा इतिबर्हिर्होमः ततोब्रह्मणान्वारब्धक
तृकंकर्म्म ततोऽग्निपश्चिमोपविष्टोब्रह्मचारीपरिसमूहनंकुर्यात् तत्रघृताक्तशुष्कनिषि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्धेतरेंधनेनपंचाहुतीर्हस्तेनैवजुहुयात् ॐअग्नेसुश्रवःसुश्रवसंमाकुरु ॐयथात्वम
ग्नेसुश्रवःसुश्रवाअसि ॐएवंमांसुश्रवः सौश्रवसंकुरु ॐयथात्वमग्नेदेवानांयज्ञस्य
निधिपाअसि ॐएवमहंमनुष्याणांवेदस्यनिधिपोभूयासम् ततःप्रदक्षिणमग्निंवारि
णापर्युक्ष्यउत्थायघृताक्तांप्रादेशमितांसमिधमादायजुहुयात्तत्रमंत्रः ॐअग्नयेसमि
धमाहार्षंबृहतेजातवेदसे यथात्वमग्नेसमिधासमिध्यसएवमहमायुषामेधयावर्चसा
प्रजयापशुभिर्ब्रह्मवर्चसेनसमिधे जीवपुत्रोममाचार्योमेधाव्यहमसान्यनिराकरि
ष्णुर्यशस्वीतेजस्वीब्रह्मवर्चस्व्यन्नादोभूयासंस्वाहा ततःसमिदंतरद्वयमनेनैवक्रमेण
प्रत्येकंहुत्वा उपविश्यतेनैवक्रमेणपंचाहुतीर्घृताक्तशुष्कनिषिद्धेतरेंधनेनजुहुयात् ॐ
अग्नेसुश्रवःसुश्रवसंमाकुरु ॐयथात्वमग्नेसुश्रवःसुश्रवाअसि ॐएवंमांसुश्रवःसौ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रवसंकुरु ॐयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि ॐएवमहंमनुष्याणावेदस्य
निधिपोभूयासं ततःप्रदक्षिणमग्निंवारिणापर्युक्ष्य तूष्णींपाणीप्रतप्यमुखंप्रतिमंत्रां
॥३४॥ तेवम्नशति ॐतनूपाअग्नेसितन्वंमेपाहि ॐआयुंदाअग्नेस्यायुर्मेदेहि ॐवर्चोदाअग्ने
सिवर्चोमेदेहि ॐअग्नेयन्मेतन्वाऊनंतन्मआपृण ॐमेधांमेदेवःसविताआदधातु ॐ
मेधांमेदेवीसरस्वतीआदधातु मेधांमेअश्विनौदेवावाधत्तांपुष्करस्त्रजौ तत्रसर्वंगा
त्रादिषुदक्षिणपाणिनास्पर्शः तत्रप्रत्येकंमंत्रः ॐअंगानिचमआप्यायंताम् इतिसर्व
गात्रालंभने ॐवाङ्मआप्यायतामितिमुखालंभने ॐप्राणश्चआप्यायतामितिना
सिकयोः ॐचक्षुश्चमआप्यायतामितिचक्षुर्द्वयस्पर्शः ॐश्रोत्रंचमआप्यायतामिति ॥३४॥
श्रोत्रद्वयस्पर्शः ॐयशोबलंचमआप्यायतामितिमंत्रपाठमात्रं ततोदक्षिणानामि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काग्रगृहीतभस्मनाललाटे ग्रीवायांदक्षिणबाहुमूलेहृदिचत्र्यायुषंकुर्यात् यथासंख्ये
नमंत्रचतुष्टयंॐत्र्यायुषंजमदग्नेरितिललाटेॐकश्यपस्यत्र्यायुषमितिग्रीवायाम्ॐ
यद्देवेषुत्र्यायुषमितिदक्षिणबाहुमूलेॐतन्नोअस्तुत्र्यायुषमितिहृदिततोव्यस्तपाणि
भ्यांपृथिवींस्पृशन्प्रथमंवैश्वानरंसंबोध्याभिवादयेत्तत्रामुकगोत्रोहममुकप्रवरोहम
मुकशर्माहंभोवैश्वानरत्वामभिवादयेइतिप्रकारः ततस्तथैववरुणंसंबोध्याभिवादये
त् तथैवाचार्यंचाभिवादयेत् ततःआयुष्मान्भवसौम्यइत्याचार्योब्रूयात् ततोग्नेरुत्तर
तः प्रागग्रान्कुशानास्तीर्य तदुपरिदक्षिणोत्तरक्रमेणासादितवारिपूर्णकलशाष्टतये
कलशानांपुरतःप्रागग्रेषुकुशेषुस्थित्वा एकस्मादाम्रपल्लवेनोदकंगृहीत्वा ॐयप्स्वंत
रग्नयःप्रविष्टागोत्द्योउपगोत्द्योमयूषोमनोहास्खलोविरुजस्तनूषेदुषुरिंद्रियहातान्विज

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हामियोरोचनस्तमिहगृह्णामि इतिमंत्रेण ततस्तेनमामभिषिंचामिश्रियैयशसेब्रह्म
णे ब्रह्मवर्चसाय इत्यात्मानमभिषिंचति ततोद्वितीयघटस्थमुदकंगृह्णामि ॐयेप्स्वं

तरग्नय० इतिमंत्रेणगृहीताम्रपल्लवेनाभिषिंचति ॐयेनाश्रियमकृणुतांयेनावमृश्य
ताँसुरां येनाक्ष्यावभ्यषिंचतांयद्वातदश्विनायशः इतिमंत्रेण ततस्तेनैवक्रमेण पुनः
येप्स्वंतरग्नय०इत्यनेनतृतीयकलशस्थजलमादाय ॐआपोहिष्ठामयोभुवस्तानऊ
र्जेदधातन महेरणायचक्षसे इतिमंत्रेणाभिषिच्यतेनैवक्रमेण येप्स्वंतरग्नयइतिमंत्रे
णचतुर्थकलशस्थजलमादाय ॐयोवः शिवतमोरसस्तस्यभाजयतेहनःउशतीरिव

मातरःइतिमंत्रेणाभिषिच्यपुनः पंचमकलशस्थंजलंयेप्स्वंतरग्नय०इतिमंत्रेणतथैवा
दायॐतस्माअरंगमामवोयस्यक्षयायजिन्वथ आपोजनयथाचनःइतिमंत्रेणाभि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षिच्य ततोवशिष्टकलशत्रितयजलंतथैव येप्स्वंतरग्नय० इतिमंत्रेणप्रत्येकंगृहीत्वा तू
ष्णींप्रत्येकमभिषिंचति ततोमेखलामोचनंशिरोभागेन ॐउदुत्तमंवरुणपाशमस्म
दवाधमंविमध्यमँश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्याम इतिमं
त्रेण दंडकृष्णाजिनेतूष्णींभूमौनिधाय अन्यद्वस्त्रंपरिधायोत्तरीयंचकृत्वाचम्य बद्धां
जलिरादित्यमुपतिष्ठेत् ब्रह्मचारी ॐउद्यन्भ्राजभृष्णुरिंद्रोमरुद्भिरस्थात् प्रातर्यांव
भिरस्थात्दशसनिरसिदशसनिंमाकुर्वाविदन्मागमयोद्यन्भ्राजभृष्णुरिंद्रोमरुद्भिर
स्थाददिवायावभिरस्थाच्छतसनिरसिशतसनिंमाकुर्वाविदन्मागमयोद्यन्भ्राजभृ
ष्णुरिंद्रोमरुद्भिरस्थात्सायंयावभिरस्थात्सहस्रसनिरसिसहस्रसनिंमाकुर्वाविदन्मा
गमय इतिमंत्रेण ततोदधितिलान्वाप्राश्याचम्य जटालोमनखादींश्छेदयित्वा

For Private and Personal Use Only

स्नात्वाचम्यप्रादेशमितोदुंबरकाष्ठेनदंतधावनं ओमन्नाद्यायव्यूहध्वँसोमोराजा
यमागमत् समेमुखंप्रमार्क्ष्यतेयशसाचभगेनच इतिमंत्रेण ततोदंतकाष्ठंपरित्यज्या
चम्यसुगंधिद्रव्येणोद्वर्तनानंतरंस्नात्वाद्विराचम्यचंदनकुंकुमादिनानासिकायामुख
स्यालंभने ॐ प्राणापानौमेतर्प्पय ॐचक्षुर्मेतर्प्पय ॐ श्रोत्रंमेतर्प्पय इतिमंत्रेणा
नुलिंपति ततःपाणीप्रक्षाल्यदक्षिणाभिमुखः पातितवामजानुः कृतापसव्योद्विगुण
भुग्नकुशत्रयतिलजलान्यादायआस्तृतकुशत्रयोपरिपितॄंस्तर्पयेत् ॐपितरःशुंधध्व
मितिमंत्रेण ततःसव्यंकृत्वा आचम्यानुलिंप्यजपेत् ॐसुचक्षाअहमक्षीभ्यांभूयास
ंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांभूयासम् इतिततोऽहतवासःपरिधानम् ॐपरिधा
स्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मिशतंचजीवामिशरदःपुरूचीरायस्पोषमभि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संव्ययिष्येइतिमंत्रेणततोयज्ञोपवीतपरिधानम् ॐयज्ञोपवीतंपरमंपवित्रंप्रजापतेर्य
त्सहजंपुरस्तात्आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः इतिमंत्रेणद्वितीय
ग्रहणम् यज्ञोपवीतमितिप्रजापतिर्ऋषिर्यजुरुपवीतदेवतायज्ञोपवीतपरिधानेविनि
योगः यज्ञोपवीतमसियज्ञस्यत्वायज्ञोपवीतेनोपनह्यामि आचमनं अथोत्तरीयंॐ
यशसामाद्यावापृथिवीयशसेंद्राबृहस्पती यशोभगश्चमाविदद्यशोमाप्रतिपद्यताम्
इतिमंत्रेण ततःपुष्पमालाग्रहणेमंत्रः ॐ याआहरज्जमदग्निःश्रद्धायैकामायेंद्रियाय
ताअहंप्रतिगृह्णामियशसाचभगेनच इतिमंत्रेणपुष्पमालाग्रहणम् ततःपुष्पमालाप
रिधानम् ॐयद्यशोप्सरसामिंद्रश्चकारविपुलंपृथु तेनसंग्रथिताःसुमनसआबध्नामि
यशोमयि इतिमंत्रेणपुष्पमालापरिधानम् अथसुप्रतिष्ठा अथोष्णीषेणशिरोवेष्टनं

For Private and Personal Use Only

ॐयुवासुवासाः परिवीतआगात्सउश्रेयान्भवतिजायमानः तंधीरासःकवयउन्नयं
तिस्वाध्योमनसादेवयंतइतिमंत्रेण ततःकुंडलेपरिदधाति ॐअलंकरणमसिभूयोलं
करणंभूयात् ततोंजनम् ॐवृत्रस्यासिकनीनकश्चक्षुर्दाअसिचक्षुर्मेदेहि ततआदर्शे
आत्मदर्शनम् ॐरोचिष्णुरसिइतिमंत्रेण ततश्छत्रग्रहणं ॐबृहस्पतेछदिरसिपाप्म
नोमामंतर्धेहि तेजसोयशसोमामंतर्धेहि इतिमंत्रेण ततःपद्भ्यामुपानहौप्रतिगृह्णाति
ॐप्रतिष्ठस्थोविश्वतोमापातमृइतिमंत्रेणततोवैणवदंडधारणम् ॐविश्वाभ्योमाना
ष्ट्राभ्यस्परिपाहिसर्वतःइतिमंत्रेण ततःस्नातकस्यनियमाः गानवादित्रनृत्यत्यागः न
तत्रगमनं क्षेमेसतिनरात्रौग्रामांतरगमनं नधावेत् नकूपेऽवेक्षणं नवृक्षारोहणं फल ॥३७॥
त्रोटनंअमार्गेणनगच्छेत् नग्नोनस्नायात् नसंधिशयनम् नविषमभूमिलंघनंअश्ली

लंनोपवदेत् उदितास्तसमयेसूर्यंनोपपश्येत्जलमध्येसूर्यं आकाशस्थंनपश्येत् देवेव
र्षतिनगच्छेत् उदकेआत्मानंनपश्येत् अजातलोम्नींप्रमत्तांपुरुषाकृतिंषंढांनगच्छेदि
त्यादि ततआचार्य्यायवरांदक्षिणांदद्यात् ततः मूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानर
मृतआजातमग्निं कवि्ँसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः स्वाहा
इतिमंत्रेण फलपुष्पसमन्वितघृतपूर्णस्रुवेणमाणवकदक्षिणकरस्पृष्टेनोत्थायपूर्णाहु
तिमाचार्य्यःकुर्य्यादिति ततउपविश्य स्रुवेणभस्मानीयदक्षिणानामिकाग्रगृहीतभ
स्मना ॐत्र्यायुषंजमदग्नेरितिललाटे ॐकश्यपस्यत्र्यायुषमितिग्रीवायाम् ॐयद्देवे
षुत्र्यायुषमितिदक्षिणबाहुमूले ॐतन्नोअस्तुत्र्यायुषमितिह्वदि इतित्र्यायुषंकुर्यात्
अनेनैवक्रमेणकुमारललाटादावपि तत्रतन्नोइत्यस्यस्थानेतत्तेइतिविशेषःततोमूर्द्धा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षतादिग्रहणम् ॥ ॥ इतिश्रीमहामत्तकमहासामंताधिपतिश्रीरामदत्तविरचिता वाजसनेयिनामुपनयनकर्मपद्धतिःसमाप्ता ॥ अथ सामग्री ॥ ॥ रोली १२ मौली ७ केशर २५ बतासे ३ अष्टाचावलपुष्प १२ पुष्पमाला धूप ३ दीप १ तांबूल ७ यज्ञोपवीत ९ प्रणीतापात्र ३ प्रोक्षणीपात्र ३ कांस्यपात्र ६ छायापात्र १ सुवर्ण १ कुशा १ स्रुवा १ गोमय एरणेगोहे पलाशसमिधा सेर ३ पूर्णपात्र ३ उपर्णे ५ धोतिया ५। २ कुपीनी ५ मृगचर्म १ पलाशदण्ड १ गूलरशाखा १ मेखलामुंजीकी १ सुहालीयासेर १ पुरवा ८ लोटिया ८ नारियल २ खड़ाऊंजोडा १ पट्टी १ चगेर १ लाठी ५ गुथली १ कसारु २ घृततिल ३ दधि १ सुपारी ११ आम्रपल्लव वृक्षादिपत्र ७ अंजन १ दर्पण १ वसु ५ मोती उपानहौ वटणश्वेत दूर्वा दोने १० अ



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वीरश्वेत ६ ब्राह्मणभोजन दक्षिणा पंचरंग ॥ २५ ॥ इतिसामग्री समाप्ता ॥ ॥ ॥
॥ श्रीगणेशायनमः ॥ अथविवाहः॥ तत्रकन्याहस्तेनषोडशहस्तमितंमंडपंतद्दक्षिणदि
शिपश्चिमांदिशमाश्रित्य मंडपसंलग्नमुत्तराभिमुखंकौतुकागारंमंडपाद्बहिरीशान्यां
दिशिजामातृचतुर्हस्तपरिमितसिकतादिपरिष्कृततुषकेशशर्करादिरहितांरम्यांवेणुनि
र्मितांवेदिंचकारयेन्‌विवाहदिनेकृतनित्यक्रियेणजामातृपित्रामातृपूजापूर्वकमाभ्यु
दयिकश्राद्धंकर्तव्यम् कन्यापितास्नातःशुचिःशुक्लांबरधरः कृतनित्यक्रियोमातृपूजा
भ्युदयिकेकृत्वा अर्हणवेलायांमंडपेप्रत्यङ्मुखः प्राङ्मुखंवरमूर्ध्वजानुंतिष्ठंतंसंबो
ध्यततः स्वस्तिवाचनंकलशगणेशादीनांपूजनंचकृत्वा ॐसाधुभवानास्तामितिप्रजा
पतिर्ऋषिर्ब्रह्मादेवतायजुर्वरार्चनेविनियोगः ॐसाधुभवानास्तामर्चयिष्यामोभवंत

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मितिब्रूयात् ॐअर्चयेतिवरेणोक्तेवरोपवेशनार्थंशुद्धमासनंदत्त्वाविष्टरमादाय ॐ
विष्टरोविष्टरोविष्टरइत्यनेनोक्ते ॐविष्टरःप्रतिगृह्यतामितिदातावदेत् ॐविष्टरंप्रतिगृ
ह्णामि इत्यभिधायवरोविष्टरंगृहीत्वा ॐवर्ष्मोऽस्मीत्याथर्वणऋषिर्विष्टरोदेवतानुष्टुप्छं
दःउपवेशनेविनियोगः ॐवर्ष्मोस्मिसमानानामुद्यतामिवसूर्य्यः इमंतमभितिष्ठामि
योमाकश्चाभिदासतिइत्यनेनासनेउत्तराग्रविष्टरोपरिवरउपविशति तत्रउपविश्यय
जमानःपाद्यमंजलिनादाय ॐपाद्यंपाद्यंपाद्यमित्यन्येनोक्ते ॐपाद्यंप्रतिगृह्यतामिति
दातावदेत् ॐपाद्यंप्रतिगृह्णामि इत्यभिधाययजमानांजलितोंजलिनापाद्यमादायव
रःविराजोदोहोसीतिप्रजापतिर्ऋषिरापोदेवतायजुः पादप्रक्षालनेजलग्रहणेविनियो ॥३९॥
गः ॐविराजोदोहोसिविराजोदोहमशीयमयिपद्यायैविराजोदोहः इतिदक्षिणपादं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रक्षालयतिअनेनैवक्रमेणानेनैवमंत्रेणप्रक्षालनम्। ततःपूर्ववद्विष्टरांतरंगृहीत्वाचरण योरधस्तात् उत्तराग्रंवरःकुर्यात् ततोदूर्वाक्षतफलपुष्पचंदनयुतार्घपात्रंगृहीत्वायज मानः ॐअर्घोर्घोर्घःइत्यनेनोक्ते ॐअर्घः प्रतिगृह्यतामितिदातावदेत् ॐअर्घंप्र तिगृह्णामीत्यभिधाययजमानहस्तादर्घंगृहीत्वा ॐआपस्थयुष्माभिः सर्वान्कामान वाप्नुवानीतिशिरस्यक्षतादिकंकिंचिद्दत्वा ॐसमुद्रंवः प्रहिणोमिस्वांयोनिमभिगच्छ त अरिष्टास्माकंवीरामापरासेचिमत्पयःइत्यर्घपात्रस्थंजलमैशान्यांदिशित्यजन्पठ ति ततआचमनीयमादाय ॐआचमनीयमाचमनीयमाचमनीयमित्यनेनोक्तेततो वरः ॐआचमनीयंप्रतिगृह्णामीत्यभिधाययजमानहस्तादाचमनीयमादाय ॐआ मागन्यशसासंसृजवर्चसा तंमाकुरुप्रियंप्रजानामधिपतिंपशूनामरिष्टिंतनूनांइ

For Private and Personal Use Only

त्यनेनसकृदाचामेत् इतिद्विस्तूष्णींततोयजमानःकांस्यपात्रस्थदधिमधुघृतानिकांस्य
पात्रपिहितान्यादाय ॐमधुपर्कोमधुपर्को मधुपर्कःइत्यनेनोक्ते ॐमधुपर्कःप्रतिगृह्य
तामितिदातावदेत् ॐमधुपर्कंप्रतिगृह्णामिइतिवरोवदेत्ॐमित्रस्यत्वाचक्षुषाप्रतीक्षे
इतियजमानकरस्थमेवनिरीक्ष्य ॐदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ता
भ्यांप्रतिगृह्णामीत्यनेनमधुपर्कंगृहीत्वा वामहस्तेकृत्वा ॐ नमःश्यावास्यायान्नशने
यत्तआविद्धंतत्तेनिष्कृंतामीत्यनामिकयांगुष्ठेनचत्रिःप्रदक्षिणमालोड्य अनामिकां
गुष्ठाभ्यांभूमौकिंचिन्निक्षिपेत् पुनस्तथैवद्विःप्रत्येकंक्षिपेत् ततोवरः ॐयन्मधुनइति
कुत्सऋषिर्मधुपर्कोदेवताजगतीछंदोमधुपर्कप्राशनेविनियोगः ॐयन्मधुनोमधव्यं
परमंरूपमन्नाद्यंतेनाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येनपरमोमधव्योन्नादोसा ॥४०॥

निइत्यनेनवारत्रयंपधुपर्कप्राशनम् प्रतिप्राशनेचैतन्मंत्रपाठः ततोमधुपर्कशे
षमसंचरदेशेधारयेत् ततोद्विराचम्य ॐवाङ्मआस्येस्तु ॐनसोर्मेप्राणोस्तु ॐअ
क्ष्णोर्मेचक्षुरस्तु ॐकर्णयोर्मेश्रोत्रमस्तु ॐबाह्वोर्मेबलमस्तु ॐऊर्वोर्मेओजोस्तु
ॐअरिष्टानिमेंगानितनूस्तन्वामेसहसंतु इत्यास्यादिप्रत्येकंसर्वगात्राणिस्पृष्ट्वा ॐ
गौगौगौरित्यनेनाभिहितेयजमानेनप्रत्युक्ते ततोवरः ॐमातारुद्राणांदुहितावसूनां
स्वसादित्यानाममृतस्यनाभिः प्रनुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट
ममचामुष्यपाप्माहतः ॐउत्सृजततृणान्यन्वितितृणंछिंद्यात्ततोवेदिकायांतुषकेश
शर्करादिरहितायांहस्तमात्रपरिमितायांचतुरस्रांभूमिंकुशैःपरिसमुह्यतान्कुशानैशा
न्यांपरित्यज्यगोमयोदकेनोपलिप्यस्फ्येनस्रुवेणवाप्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णत्रिरुल्लिख्यउल्लेखनक्रमेणानामिकांगुष्ठाभ्यामुपांशुउद्धृत्यजलेनाभ्युक्ष्य तत्रतू
ष्णींकांस्यपात्रस्थंवह्निमग्निकोणादानीयप्रत्यङ्मुखमुपसमाधाय तद्रक्षार्थंकिंचि
न्नियुज्यकौतुकागाराद्वरःकन्यामानीयमंडपेउपविश्य ॐजरांगच्छपरिधत्स्ववासोभ
वाकृष्टीनामभिशस्तिपावाशतंजीवामशरदः सुवर्चारयिंचपुत्राननुसंव्ययस्वायुष्मती
दंपरिधत्स्ववासःइतिपठित्वापरिधानवस्त्रंतस्यैददातिवरः ततः ॐयाअकृतन्नवयंया
अतन्वतायाश्चदेवीस्तंतूनभितोततंथतास्त्वादेवीर्जरसेसंव्ययस्वायुष्मतीदंपरिधत्स्व
वासःइतिपठित्वोत्तरीयंददाति ततोवरःॐपरिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टि
रस्मि शतंचजीवामिशरदःपुरूचीरायस्पोषमभिसंव्ययिष्येइतिपठित्वाअधोवस्त्रंवरः
परिधत्ते ॐयशसामाद्यावापृथिवीयशसेंद्राबृहस्पती यशोभगश्चमाविदद्यशोमाप्र



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिपद्यताम् इतिपठित्वोत्तरीयंपरिदधातिवरः ततोवरस्यकन्यायाश्चद्विराचमनंततःक
न्याप्रदेनपरस्परंसमंजेथांइतिप्रेषणंकन्यावरयोःपरस्परमभिमुखीकरणं ॐसमंजंतु
विश्वेदेवाः समापोहृदयानिनौ संमातरिश्वासंधातासमुदेष्ट्रीदधातुनौइतिवरः पठति
ततः कन्याप्रदकर्तृकंग्रंथिबंधनम् बंधनंकन्यावरयोः अथहस्तलेपनंशाखोच्चारणम्
अथकन्यादानम्॥ दाताशंखस्थदूर्वाक्षतफलपुष्पचंदनजलान्यादाय जामातृदक्षि
णकरोपरिकन्यादक्षिणकरंनिधाय ॐदाताहंवरुणोराजाद्रव्यमादित्यदैवतंवरोसौवि
ष्णुरूपेणप्रतिगृह्णात्वयंविधिः इतिपठित्वागोत्रोच्चारणंकुर्यात् ॐअद्यामुकमासीया
मुकपक्षीयामुकतिथौअमुकवासरेअमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणःप्रपौत्रा
यअमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणःपौत्रायअमुकगोत्रस्यामुकप्रवरस्यामुक

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







शर्मणःपुत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीम् अमुकगोत्रस्या मुकप्रवरस्यामुकशर्मणःपौत्रीम् अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीम् इ त्यनेनक्रमेणत्रिरावर्त्यपठनीयम् अमुकगोत्रायामुकप्रवराय अमुकशर्मणेवराय अमुकगोत्रां अमुकप्रवरां अमुकनाम्नींइमांकन्यांसालंकारांप्रजापतिदैवत्यांस्वर्गका मःपत्नीत्वेनतुभ्यमहंसंप्रददे ॐस्वस्तीतिप्रतिवचनम् ॐद्यौस्त्वाददातुपृथिवीत्वाप्रति गृह्णातुइतिवरःपठेत् ततःकन्याप्रदः ॐअद्यकृतैतत्कन्यादानप्रतिष्ठार्थंइदंसुवर्णमग्निदै वतं अमुकगोत्रायअमुकप्रवराय अमुकशर्मणेवरायदक्षिणांतुभ्यमहंसंप्रददेइतिद क्षिणांदद्यात् ॐस्वस्तीतिप्रतिवचनम्गोमिथुनंवादद्यात् ॐकोदात्कस्माअदात्कामो दात्कामायादात् कामोदाताकामःप्रतिग्रहीताकामैतत्ते इतिवरःपठेत् ततस्तांपाणौ



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गृहीत्वा ॐयदैषिमनसादूरंदिशोनुपवमानोवाहिरण्यपर्णोवैकर्णः सत्वामन्मनसां करोतु श्रीअमुकदेवीइतिपठन्निष्क्रामति ततोवेदिदक्षिणस्यांदिशिवारिपूर्णदृढक लशंऊर्द्धंतिष्ठतोमौनिनःपुरुषस्यस्कंधेअभिषेकपर्यंतंधारयेत् ततःपरस्परंसमीक्षे थां इतिकन्याप्रदप्रैषानंतरं ॐअघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यःसुमनाःसुवर्चाः वीरसूर्देवकामास्योनाशंनोभवद्विपदेशंचतुष्पदे सोमःप्रथमोविविदेगंधर्वोविविदउ त्तरः तृतीयोग्निष्टेपतिस्तुरीयस्तेमनुष्यजाः सोमोददद्गंधर्वायगंधर्वोददग्नये रयिं चपुत्रांश्चादादग्निर्मह्यमथोइमां सानःपूषाशिवतमामेरयसानऊरूउशतीविहरयस्य मुशंतःप्रहरामशेपंयस्यामुकामाबहवोनिविष्ट्यै ४ इतिवरपठितमंत्रांतेपरस्परंनिरी क्षणं ततोग्निंप्रदक्षिणीकृत्य पश्चादग्नेरहतवस्त्रवेष्टिततृणपुलकेकटेवातदुपरिदक्षिणं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चरणंदत्त्वा वधूंदक्षिणतःकृत्वातामुपवेश्यस्वयमुपविश्यवरः पुष्पचंदनतांबूलवस्त्रा
ण्यादाय ॐअद्यकर्तव्यविवाहहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगो
त्रममुकशर्माणंब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनहोतृत्वेनचत्वामहंवृ
णे इतिब्राह्मणंवृणुयात् ॐवृतोऽस्मीतिप्रतिवचनम् यथाविहितंकर्मकुरुइतिवरेणो
क्ते ॐकरवाणीतिब्राह्मणोवदेत् ततोग्नेर्दक्षिणतःशुद्धमासनंदत्त्वातदुपरिप्रागग्रान्कु
शानास्तीर्य ब्रह्माणमग्निंप्रदक्षिणक्रमेणानीयात्रत्वंमेब्रह्माभवेत्यभिधायकल्पिता
सनेउपवेशयेत् ॐ अद्यकर्तव्यविवाहकर्म्मणि कृताकृतावेक्षणरूपाचार्यकर्मकर्तुम
मुकगोत्रममुकशर्माणंब्राह्मणमेभिःपुष्पचंदनतांबूलवासोभिः आचार्यत्वेनत्वामहंवृ
णे ॐवृतोऽस्मीतिप्रतिवचनं ततःप्रणीतापात्रंपुरतःकृत्वावारिणापूर्यकुशैराच्छाद्य ब्र



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह्मणोमुखमवलोक्य अग्नेरुत्तरतःकुशोपरिनिदध्यात् ततःपरिस्तरणंबर्हिषश्चतुर्थभा
गमादायआग्नेयादीशानांतंब्रह्मणोऽग्निपर्यंतं नैर्ऋत्याद्वायव्यांतम् अग्नितःप्रणीताप
र्यंतं ततोऽग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयंपवित्रकरणार्थं साग्रमनंत
र्गर्भकुशपत्रद्वयंप्रोक्षणीपात्रं आज्यस्थालीसम्मार्जनार्थंकुशत्रयं उपयमनार्थंवेणीरू
पकुशत्रयंसमिधस्तिस्रः स्रुवआज्यंषट्पंचाशदुत्तरमुष्टिशतद्वयावच्छिन्नतंडुलपूर्णपा
त्रंपवित्रच्छेदनकुशानां पूर्वपूर्वदिशिक्रमेणासादनीयं अथतस्यामेवदिशिअसाधा
रणवस्तून्युपकल्पनीयानि तत्रशमीपालाशमिश्रालाजाः दृषदुपलं कुमारीभ्रातासू
र्यःदृढपुरुषः अन्यदपितदुपयुक्तमालेपनादिद्रव्यंततः पवित्रच्छेदनकुशैःपवित्रेछित्त्वा
ततः सपवित्रकरेणप्रणीतोदकंत्रिः प्रोक्षणीपात्रेनिधायअनामिकांगुष्ठाभ्यांउत्तराग्रे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पवित्रेगृहीत्वात्रिरुत्पवनं ततःप्रोक्षणीपात्रस्यसव्यहस्तेकरणं अनामिकांगुष्ठाभ्यांप
वित्रेगृहीत्वात्रिरुद्दिंगनं प्रणीतोदकेनप्रोक्षणीजलेनयथासादितवस्तुसेचनं ततोऽग्नि
प्रणीतयोर्मध्येप्रोक्षणीपात्रनिधानम् आज्यस्थाल्यामाज्यनिर्वापः ततोऽधिश्रयणं त
तोज्वलत्तृणादिनाहविर्वेष्टयित्वाप्रदक्षिणक्रमेणवह्नौतत्प्रक्षेपः पर्यग्निकरणं ततःस्रुव
प्रतपनंकृत्वासम्मार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतः स्रुवंसंमृज्यप्रणीतोदकेनअ
भ्युक्ष्यपुनःप्रतप्यस्रुवंदक्षिणतोनिदध्यात् ततआज्यस्याग्नेरवतारणंततआज्येप्रोक्ष
णीवदुत्पवनम् अवेक्ष्यसत्यपद्रव्येतन्निरसनं पुनःप्रोक्षण्युत्पवनं ततःउपयमनकुशा
नादायउत्तिष्ठन्प्रजापतिंमनसाध्यात्वा तूष्णीमग्नौघृताक्तास्तिस्रःसमिधःक्षिपेत् तत ॥४४॥
उपविश्यसपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणाग्निपर्युक्षणंकृत्वा प्रणीतापात्रेपवित्रे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निधायपातितदक्षिणजानुः कुशेनब्रह्मणान्वारब्धःसमिद्धतमेऽग्नौस्रुवेणाज्याहुतीर्जु
होति तत्राघारादारभ्यद्वादशाहुतिषुतत्तदाहुत्यनंतरंस्रुवावस्थितहुतशेषघृतस्यप्रोक्ष
णीपात्रेप्रक्षेपःॐप्रजापतयेस्वाहाइदंप्रजापतये॰इतिमनसाॐइंद्रायस्वाहाइदमिंद्रा
य॰इत्याघारौॐअग्नयेस्वाहा इदमग्नये॰ ॐसोमायस्वाहा इदंसोमाय॰ इत्याज्य
भागौ ॐभूःस्वाहाइदमग्नये॰ ॐभुवःस्वाहा इदंवायवे॰ ॐस्वःस्वाहा इदंसूर्याय॰
एतामहाव्याहृतयःत्वन्नो अग्नेइतिवामदेवऋषिरग्नीवरुणौदेवतेत्रिष्टुप्छंदोहोमेविनि
योगःॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडो अवयासिसीष्ठाःयजिष्ठोवह्नितमःशोशु
चानोविश्वाद्वेषाᳲसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां॰ ॐसत्वन्नोअग्नेवमो
भवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणᳲरराणोव्वीहिमृडीकᳲसुहवो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नएधिस्वाहाइदमग्नीवरुणाभ्यां० अयाश्चाग्नेइतिवामदेवऋषिरग्निर्देवतात्रिष्टुप्छंदः
सर्वप्रायश्चित्तहोमेविनियोगः ॐअयाश्चाग्नेऽस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि
अयानोयज्ञंवहास्ययानोधेहिभेषजंस्वाहाइदमग्नये० ॐयेतेशतंवरुणयेसहस्रंय
ज्ञियाःपाशाविततामहांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः स्वर्काः स्वा
हा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भःस्वर्केभ्यश्च० ॐउदुत्तमंवरु
णपाशमस्मदवाधमंविमध्यमंश्रथाय अथाव्वयमादित्यव्रतेतवानागसोअदि
तयेस्यामस्वाहा इदंवरुणाय० एताःप्रायश्चित्तसंज्ञकाः ततोन्वारब्धंविनाॐप्रजाप
तयेस्वाहाइदंप्रजापतये० ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते०ॐउदकोप
स्पर्शनम् ॥ अथराष्ट्रभृत्यः ॐऋताषाडृतधामाग्निर्गंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मै



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हावाट् इदमृताषाहेऋतधाम्नेऽग्नयेगंधर्वाय० १ ॐ ऋताषाडृतधामाग्निर्गंधर्वस्त
स्यौषधयोऽप्सरसोमुदोनामताभ्यःस्वाहा इदमोषधीभ्योप्सरोभ्योमुद्भ्यो० २ ॐस
ँहितोविश्वसामासूर्य्योगंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्इदंसँहितायवि
श्वसाम्नेसूर्यायगंधर्वाय० ३ ॐसँहितोविश्वसामासूर्योगंधर्वस्तस्यमरीचयोऽ
प्सरसआयुवोनामताभ्यःस्वाहा इदंमरीचिभ्योप्सरोभ्यआयुभ्यो० ४ ॐसुषुम्णः
सूर्यरश्मिश्चंद्रमागंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् इदंसुषुम्णायसूर्यरश्म
येचंद्रमसेगंधर्वाय० ५ ॐसुषुम्णःसूर्यरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसो
भेकुरयोनामताभ्यःस्वाहा इदंनक्षत्रेभ्योप्सरोभ्योभेकुरिभ्यो० ६ ॐइषिरोविश्वव्य
चावातोगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मै स्वाहावाट् इदमिषिरायविश्वव्यच

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिवातायगंधर्वाय० ७ ॐइषिरोविश्वव्यचावातोगंधर्वस्तस्यापोप्सरसऊर्जोनाम ताभ्यःस्वाहाइदमभ्योऽप्सरोभ्यऊर्ग्भ्यो० ८ ॐभुज्युःसुपर्णोयज्ञोगंधर्वःसनइदं ब्रह्मक्षत्रंपातुतस्मैस्वाहा वाट्इदंभुज्यवेसुपर्णाययज्ञायगंधर्वाय० ९ ॐभुज्युःसुप र्णोयज्ञोगंधर्वस्तस्यदक्षिणाअप्सरसःस्तवानामताभ्यःस्वाहा इदंदक्षिणाभ्योऽप्स रोभ्यःस्तवाभ्यो० १० ॐप्रजापतिर्विश्वकर्मामनोगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मै स्वाहा वाट् इदंप्रजापतयेविश्वकर्मणेमनसेगंधर्वाय०११ ॐप्रजापतिर्विश्वकर्माम नोगंधर्वस्तस्यऋक्सामान्यप्सरसएष्टयोनामताभ्यःस्वाहा इदमृक्सामभ्योप्सरो भ्यएष्टिभ्यो०१२ इतिराष्ट्रभृतः॥ अथजयाहोमः ॐचित्तंचस्वाहा इदंचित्ताय०ॐ चित्तिश्चस्वाहा इदंचित्त्यै० ॐआकूतंचस्वाहाइदमाकूताय० ॐआकूतिश्चस्वा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हाइदमाकूत्यै० ॐविज्ञातंचस्वाहाइदंविज्ञाताय० ॐविज्ञातिःस्वाहा इदंविज्ञात्यै० ॐमनश्चस्वाहा इदंमनसे० ॐशक्करीश्चस्वाहा इदंशक्करीभ्यो० ॐदर्शश्चस्वाहा इदं दर्शाय० ॐपौर्णमासंचस्वाहा इदंपौर्णमासाय० ॐबृहच्चस्वाहाइदंबृहते० ॐरथं तरंचस्वाहाइदंरथंतराय० ॐप्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रःपृतनाज्येषुत स्मैविशःसमनमंतुसर्वाःसउग्रःसइहव्योबभूवस्वाहा इदंप्रजापतयेजयानिंद्राय० इ तिजयाहोमःउदकोपस्पर्शनम्॥अथाभ्यातानहोमः ॐअग्निर्भूतानामधिपतिःसमाव त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याः स्वाहा इदमग्नयेभूतानामधिपत० ॐइंद्रोज्येष्ठानामधिपतिःसमावत्वस्मिन्ब्रह्मण्य स्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याःस्वाहा इदमिंद्राय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्येष्ठानामधिपतये० ॐयमःपृथिव्याअधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याऽस्वाहा इदंयमायपृथिव्या अधिपतये० अत्रप्रणीतोदकस्पर्शः ॐवायुरंतरिक्षस्याधिपतिः समावत्वस्मिन्ब्रह्म ण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याऽस्वाहा इदं वायवेंऽतरिक्षस्याधिपतये० ॐसूर्योदिवोधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्ष त्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याऽस्वाहा इदंसूर्यायदिवोधि पतये० ॐचंद्रमानक्षत्राणामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशि ष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यां देवहूत्याऽस्वाहा इदंचंद्रमसेनक्षत्राणाधिप तये० ॐबृहस्पतिर्ब्रह्मणोधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां

पुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्यांऽस्वाहा इदंबृहस्पतयेब्रह्मणोऽधिपतये० ॐ मित्रःसत्यानामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्यांऽस्वाहा इदंमित्रायसत्यानामधिपतये० ॐवरुणोपामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्याम्पुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्यांऽस्वाहा इदंवरुणायापामधिपतये० ॐ समुद्रःस्रोत्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्यांऽस्वाहा इदंसमुद्रायस्रोत्यानामधिपतये० ॐ अन्नंऽसाम्राज्यानामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्यांऽस्वाहा इदमन्नायसाम्राज्यानामधिपतये० ॐसोमओषधीनामधिपतिः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेव हूत्याᳵस्वाहा इदंसोमायौषधीनामधिपतये० ॐ सविताप्रसवानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपरोधायामस्मिन्कर्म्मण्यस्यांदेव हूत्याᳵस्वाहा इदंसवित्रेप्रसवानामधिपतये० ॐरुद्रःपशूनामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याᳵस्वाहा इदंरुद्रायपशूनामधिपतये० अत्रप्रणीतोदकस्पर्शः ॐत्वष्टारूपाणामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याᳵस्वाहा इदंत्वष्ट्रेरूपाणामधिपतये० ॐ विष्णुःपर्वतानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याᳵ



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाहा इदंविष्णवेपर्वतानामधिपतये० ॐ मरुतोगणानामधिपतयस्तेमावन्त्व स्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्यांᳩस्वा हा इदंमरुभ्द्योगणानामधिपतिभ्यो० ॐ पितरःपितामहाःपरेवरेततास्ततामहाइ हमावन्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेव हूत्यांᳩस्वाहा इदंपितृभ्यःपितामहेभ्यःपरेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यो० अत्रप्र णीतोदकोपस्पर्शनम् इत्यभ्याताननामकम् ॐअग्निरैतुप्रथमोदेवतानाᳩसोस्यै प्रजांमुंचतुमृत्युपाशात् तदयᳩराजावरुणोनुमन्यतांयथेयᳩस्त्रीपौत्रमघन्नरोदा त्स्वाहा इदमग्नये० ॐइमामग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घमायुः असू न्योपस्थाजीवतामस्तुमातापौत्रमानंदमभिविबुध्यतामितᳩस्वाहा इदमग्नये० ॐ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वस्तिनोअग्नेदिवापृथिव्याविश्वानिधेत्ध्ययथायजत्रयदस्यां महिदिविजातंप्रशस्तं
तदस्मासुद्रविणंधेहिचित्रꣳस्वाहा इदमग्नये० ॐसुगंनुपंथांप्रविशन्नएहिज्योति
ष्मद्धेत्ध्यजरन्नआयुः अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोअभयंकृणोतुस्वाहा इदंवै
वस्वताय० अत्रप्रणीतोदकस्पर्शनम् ततअंतःपटं ॐपरंमृत्योअनुपरेहिपंथांयस्ते
अन्यइतरोदेवयानात् चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजाꣳरीरिषोमोतवीरान्
स्वाहा इदंमृत्यवे० अत्रप्रणीतोदकोपस्पर्शनम् ततोवधूमग्रतःकृत्वा वरोवधूश्चद्वा
वपिप्राङ्मुखौस्थितौभवतः ततोवरांजलिपुटोपरिसंलग्नवध्वंजलिस्थघृताभिघारि
तवधूभ्रातृदत्तशमीपालाशमिश्रैर्लाजैर्वधूकर्तृकोमंत्रपाठपूर्वकोहोमः तत्रमंत्राः अ
र्यमणमित्याथर्वणऋषिरग्निर्देवतानुष्टुपूछंदोलाजाहोमेविनियोगः ॐअर्यमणंदेवं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कन्याअग्निमयक्षत सनोअर्यमादेवःप्रेतोमुंचंतुमापतेस्वाहा इदमर्यम्णेदेवाय० ॐ
इदंनार्युपब्रूतेलाजानावपंतिका आयुष्मानस्तुमेपतिरेधंतांज्ञातयोममस्वाहा इदम
ग्नये० ॐइमांलाजानावपाम्यग्नौसमृद्धिकरणंतव ममतुभ्यंचसंवननंतदग्निरनुम
न्यतामियंस्वाहा इदमग्नये० ततोवरोवधूदक्षिणहस्तंसांगुष्ठंगृह्णाति ॐगृभ्णामि
तेसौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः भगोअर्यमासवितापुरंधिर्म्मत्वंत्वादु
र्गार्हपत्यायदेवाः अमोहमस्मिसात्वंसात्वमस्यमोअहंसामाहमस्मिऋक्त्वंद्यौरहं
पृथिवीत्वंतावेहिविवहावहै सहरेतोदधावहै प्रजांप्रजनयावहै पुत्रान्विंदावहै बहूं
स्तेसंतुजरदष्टयः संप्रियौरोचिष्णूसुमनस्यमानौ पश्येमशरदःशतं जीवेमशरदःशत
ंशृणुयामशरदःशतमितिमंत्रेण अथवधूमग्नेरुत्तरतःप्राङ्मुखःपूर्वोपकल्पितंदृष

For Private and Personal Use Only

दुपलंदक्षिणपादेनारोहयतिवरः ॐआरोहेममश्मानमश्मेवत्वंस्थिराभव अभि
तिष्ठपृतन्यतोवबाधस्वपृतनायतः इतिमंत्रेणआरूढायामेवतस्यांवरोगाथांगायति
ॐसरस्वतीप्रेदमवसुभगेवाजिनीवती यांत्वाविश्वस्यभूतस्यप्रजायामस्याग्रतःय
स्याभूतंसमभवद्यस्यांविश्वमिदंजगत् तामद्यगाथांगास्यामियास्त्रीणामुत्तमं
यशः ततोग्रेवधूःपश्चाद्वरः प्रणीताब्रह्मसहितमग्निप्रदक्षिणंकुरुतः तत्रवरपठनीयो
मंत्रः ॐतुभ्यमग्रेपर्य्यवहन्सूर्यांवहतुनासह पुनःपतिभ्योजायांदाअग्नेप्रजयासह
ततःपश्चादग्नेः स्थित्वा लाजहोमसांगुष्ठहस्तग्रहणाश्मारोहणगाथागानाग्निप्रदक्षि
णाः पुनरपितथैवएतेनैवलाजाहुतयःसांगुष्ठहस्तग्रहणत्रयम् गाथागानत्रयंप्रदक्षि
णत्रयंसंपद्यते ततोवशिष्टलाजैःकन्याभ्रातृदत्तैरंजलिस्थशूर्पकोणेनवधूर्जुहोतिॐ



For Private and Personal Use Only

भगायस्वाहा इदंभगाय० चतुर्थंभ्रमणंतूष्णीं अग्रेवरःपश्चात्वधूःततस्तूष्णींपरिक्र
मणम् ततोवरःउपविश्यब्रह्मणान्वारब्धःआज्येनप्राजापत्यंजुहुयात् ॐप्रजापतये
स्वाहा इदंप्रजापतये० इतिमनसा अत्रप्रोक्षणीपात्रेहुतशेषाज्यप्रक्षेपः ततआलेप
नेनोत्तरोत्तरकृतसप्तमंडलेषुसप्तपदाक्रमणंवरः कारयन्वक्ष्यमाणमंत्रैः तत्रप्रथमे
एकमिषेविष्णुस्त्वांनयतु द्वितीयेद्वेऊर्जेविष्णुस्त्वांनयतुतृतीयेत्रीणिरायस्पोषायवि
ष्णुस्त्वांनयतुचतुर्थेचत्वारिमायोभवायविष्णुस्त्वांनयतु पंचमेपंचपशुभ्योविष्णु
स्त्वांनयतुषष्ठेषड्तुभ्योविष्णुस्त्वांनयतुसप्तमेसखेसप्तपदाभवसामामनुव्रताभववि
ष्णुस्त्वांनयतुततोग्नेःपश्चादुपविश्यपुरुषस्यस्कंधेस्थितकुंभादाम्रपल्लवेनजलमानीय
तेनचवरोवधूमेनांमूर्द्धन्यभिषिंचतिॐआपःशिवाः शिवतमाः शांताःशांततमास्ता

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तेकृण्वंतुभेषजमितिपुनस्तथैवानीतजलेनात्मानमभिषिंचति आपोहिष्ठामयोभुव
स्तानऊर्जेदधातन महेरणायचक्षसे योवःशिवतमोरसस्तस्यभाजयतेहनःउशती
रिवमातरःतस्माअरंगमामवोयस्यक्षयायजिन्वथआपोजनयथाचनःइतितिस्रभिः
अथैनांसूर्यमुदीक्षस्वेति ॐतच्चक्षुरित्यनेनमंत्रेणवधूःसूर्यंपश्यति अस्तमितेसूर्ये
ध्रुवमुदीक्षस्वेतिपतिप्रेषानंतरंध्रुवंपश्यति तत्रपठनीयोमंत्रः ॐध्रुवमसिध्रुवंत्वाप
श्यामिध्रुवैधिपोष्यामयिमह्यंत्वादात् बृहस्पतिर्मयापत्याप्रजावतीसंजीवशरदःश
तमितिपृष्टासायंदिनंपश्यति तथापिपश्यामीतिब्रूयात् ततोवरोवधूदक्षिणांसोपरि
हस्तंनीत्वातस्याहृदयमालभेत् ममव्रतेतेहृदयंदधामि ममचित्तमनुचित्तंतेअस्तु
ममवाचमेकमनाजुषस्व प्रजापतिष्ट्वानियुनक्तुमह्यमितिमंत्रेण अथैनामभिमंत्र



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतिवरः ॐसुमङ्गलीरियंवधूरिमांसमेतपश्यत सौभाग्यमस्यैदत्त्वायाथास्तंविप रेतनइतिमंत्रेण अथवधूंबलवान्कश्चिद्ब्राह्मणउत्थायप्रागुदग्वानुगुप्तागारेलोहिता नडुहचर्मणिप्रतिलोमास्तीर्णेउपवेशयेत्वरोवा ॐइहगावोनिषीदंत्विहाश्वाइहपूरुषा इहोसहस्रदक्षिणोयज्ञइहपूषानिषीदत्विवितिमंत्रेण अथस्विष्टकृद्धोमः ॐअग्नयेस्विष्ट कृतेस्वाहा इदमग्नयेस्विष्टकृते० स्रुवावशिष्टाज्यस्यप्रोक्षणीपात्रेप्रक्षेपः अयंचहोमो ब्रह्मणान्वारब्धकर्तृकः ततआचम्यसंस्रवप्राशनम् अथाचम्य ॐअद्यकृतैत द्विवाहहोमकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्म्मणेब्रा ह्मणायदक्षिणांतुभ्यमहंसंप्रददे इति ब्रह्मणेदक्षिणांदद्यात् स्वस्तीतिप्रतिवचनम् ॐअद्यकृतैतद्विवाहहोमकर्म्मणिआचार्यकर्मप्रतिष्ठार्थंइदंहिरण्यमग्निदैवतद्रव्यम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 यथानामगोत्रायाऽमुकशर्म्मणेब्राह्मणायदक्षिणांतुभ्यमहंसंप्रददे ततोब्रह्मग्रंथिवि 
मोकः ॐसुमित्रियानआपओषधयःसंतु इतिपवित्रंगृहीत्वा प्रणीताजलेनशिरः
 संमृज्य ॐदुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांप्रणीतांन्युब्जी
कुर्यात् ततआस्तरणक्रमेणबर्हिरुत्थाप्याज्येनाभिघार्यहस्तेनैवबर्हिर्होमः तत्रमंत्रः
ॐदेवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञꣳस्वाहा व्वातेधाः स्वाहा
ततउत्थायवधूदक्षिणहस्तेनस्रुवस्पृष्टघृतपुष्पफलैःपूर्णाहुतिः तत्रमंत्रः ॐमूर्द्धानंदि
वोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं कविꣳसम्राजमतिथिंजनानामासन्ना
पात्रंजनयंतदेवाःस्वाहा ततःस्रुवेणभस्मानीयदक्षिणानामिकाग्रगृहीतभस्मना ॐ 
त्र्यायुषंजमदग्नेरितिललाटे ॐकश्यपस्यत्र्यायुषंइतिग्रीवायां ॐयद्देवेषुत्र्यायुषंइतिद

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षिणांसे ॐतन्नोअस्तुत्र्यायुषमितिहृदि एवंवध्वाअपिकुर्यात् तन्नोइत्यस्यस्थानेत
त्तेइतिविशेषः ततआचारात् शणशंखशमीसुवर्णप्रेरितसिंदूरकरणंवरकर्तृकम् ततो
न्यैरपिप्रतिष्ठितस्त्रीपुरुषैःसिंदूरकरणंग्राम्यवचनंवरःकुर्यात् ग्राम्याःस्त्रियः अथवेदीतो
मंडपमागत्यदूर्वाक्षतादिग्रहणंततस्त्रिरात्रमक्षारालवणाशिनौअधःशायिनौनिवृत्त
मैथुनौभवतः प्राङ्मुखौवधूवरौस्थितौभवतः ॥ इतिविवाहकर्मपद्धतिःसमाप्ता ॥
अथचतुर्थीकर्म ततश्चतुर्थ्यामपररात्रेचतुर्थीकर्म तच्चगृहाभ्यंतरएवकार्यम् ततःउद्व
र्तनादिकृत्वा युगकाष्ठमुपविश्यस्नात्वाशुद्धवस्त्रंपरिधायगृहंप्रविश्यवधूवरौप्राङ्मुखौ
भवतः ॐगणपत्यादिदेवतापूजनं ततःकुशकंडिकारंभःतत्रक्रमःजामातृहस्तपरिमि
तांवेदिंकुशैःपरिसमुह्य तान्कुशानैशान्यांपरित्यज्य गोमयोदकेनोपलिप्यस्फ्येनस्रु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वेणवाप्रागग्रप्रादेशमात्रत्रिरुत्तरोत्तरक्रमेणोल्लिख्यउल्लेखनक्रमेणानामिकांगुष्ठा
भ्यांमृदमुद्धृत्यजलेनाभ्युक्ष्य तत्रतूष्णींकांस्यपात्रेणाग्निमानीय स्वाभिमुखंनिद
ध्यात् ततःपुष्पचंदनतांबूलवस्त्राण्यादाय ॐअस्यांरात्रौकर्त्तव्यचतुर्थीहोमकर्मणि
कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुंहोतृकर्म्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमे
भिःपुष्पचंदनादिभिर्ब्रह्मत्वेनहोतृत्वेनचत्वामहंवृणेइतिब्राह्मणंवृणुयात् ॥ वृतोस्मिइ
तिप्रतिवचनम् यथाविहितंकर्म्मकुर्विंतिवरेणोक्ते ॐकरवाणीतिब्राह्मणोवदेत् ततो
ग्नेर्दक्षिणतःशुद्धमासनंदत्त्वा तदुपरिप्रागग्रान्कुशानास्तीर्य ब्राह्मणमग्निंप्रदक्षिण
क्रमेणानीय ॐअत्रत्वंमेब्रह्माभवेत्यभिधाय ॐभवानीतिब्राह्मणेनोक्तेकल्पितास ॥५३॥
नेउदङ्मुखंब्राह्मणमुपवेशयेत् ततःपृथूदकपात्रमग्नेरुत्तरतःप्रतिष्ठाप्य प्रणीतापा

For Private and Personal Use Only

त्रंपुरतःकृत्वा वारिणापरिपूर्यकुशैराच्छाद्य ब्रह्मणोमुखमवलोक्याग्नेरुत्तरतःकुशोप
रिनिदध्यात् ततःपरिस्तरणंबर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतंब्रह्मणोग्निप
र्यंतं नैर्ऋत्याद्वायव्यांतं अग्नितःप्रणीतापर्यंतं ततोग्नेरुत्तरतः पश्चिमदिशिपवित्रच्छेद
नार्थंकुशत्रयंपवित्रकरणार्थंसाग्रमनंतर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रंआज्यस्थाली
संमार्जनार्थंकुशत्रयंउपयमनार्थंवेणीरूपकुशत्रयं समिधस्तिस्रःस्रुवःआज्यंषट्पं
चाशदुत्तरवरमुष्टिशतद्वयावच्छिन्नामतंडुलपूर्णपात्रं एतानिपवित्रच्छेदनकुशानांपू
र्वपूर्वदिशिक्रमेणासादनीयानिततः पवित्रच्छेदनकुशैःपवित्रेछित्वा प्रादेशमितपवि
त्रकरणंततःसपवित्रकरेणप्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय अनामिकांगुष्ठाभ्या
मुत्तराग्रेपवित्रेधृत्वात्रिरुत्पवनंततःप्रोक्षणीपात्रस्यसव्यहस्तकरणं पवित्रेगृहीत्वात्रि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुद्दिंगनंप्रणीतोदकेनप्रोक्षणीप्रोक्षणं ततःप्रोक्षणीजलेनयथासादितवस्तुसेचनम् त
तोग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिधाय आज्यस्थाल्यामाज्यानिर्वापः ततोधिश्रय
णं ततोज्वलत्तृणादिनाहविर्वेष्टयित्वा प्रदक्षिणक्रमेणपर्यग्निकरणं ततःस्रुवंप्रतप्य
संमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतःस्रुवसंमार्जनं प्रणीतोदकेनाभ्युक्ष्य पुनःप्र
तप्यस्रुवंदक्षिणतोनिदध्यात् ततःआज्यस्याग्नेरवतारणम् ततआज्येप्रोक्षणीवदुत्प
वनंअवेक्ष्यसत्यपद्रव्येतन्निरसनं पुनःपूर्ववत्प्रोक्षण्युत्पवनं उपयमनकुशान्वाम
हस्तेनादाय उत्तिष्ठन्प्रजापतिंमनसाध्यात्वातूष्णीमग्नौघृताक्ताःसमिधस्तिस्रःक्षि
पेत् ततःउपविश्यप्रोक्षणीजलेनाग्निंप्रदक्षिणंपर्युक्ष्यपवित्रंप्रोक्षणीपात्रेधृत्वाब्रह्मणा
न्वारब्धःपातितदक्षिणजानुर्जुहुयात् तत्राघारादारभ्याहुतिचतुष्टयेतत्तदाहुत्यनंतरं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्रुवावस्थिताज्यंप्रोक्षण्यांक्षिपेत् ॐप्रजापतयेस्वाहा इदंप्रजापतये०इतिमनसाॐ
इंद्रायस्वाहा इदमिंद्राय०इत्याघारौ ॐअग्नयेस्वाहा इदमग्नये० ॐसोमायस्वाहा
इदंसोमाय० इत्याज्यभागौ ततआज्याहुतिपंचतयेस्थालीपाकाहुतौचप्रत्याहुत्यनं
तरंस्रुवावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपः ततोब्रह्मणान्वारब्धंविना ॐअग्न
येप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैपति
घ्नीतनूस्तामस्यैनाशयस्वाहाइदमग्नये०ॐवायोप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसि
ब्राह्मणस्त्वानाथकामउपधावामियास्यैप्रजाघ्नीतनूस्तामस्यैनाशयस्वाहा इदंवा
यवे० ॐसूर्यप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावा
मियास्यैपशुघ्नीतनूस्तामस्यैनाशयस्वाहा इदंसूर्यायन०ॐचंद्रप्रायश्चित्तेत्वंदेवानां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैगृहघ्नीतनूस्तामस्यैनाशाय स्वाहा इदंचंद्राय० ॐगंधर्वप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैयशोघ्नीतनूस्तामस्यैनाशयस्वाहा इदंगंधर्वाय० चरुमभिघार्य ततःस्थालीपाकेनजुहुयात् ॐप्रजापतयेस्वाहा इदंप्रजापतये० इतिमनसा अग्न्याहुतिनवकेहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपः अयंचहोमोब्रह्मणान्वारब्धकर्तृकःततः आज्यस्थालीपाकाभ्यांस्विष्टकृद्धोमः ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते० ततःआज्येन ॐभूःस्वाहा इदमग्नये० ॐभुवःस्वाहा इदंवायवे०ॐस्वःस्वाहा इदंसूर्याय०एतामहाव्याहृतयः ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नी



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वरुणाभ्यांन० ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वनोव
रुणंरराणोव्वीहिम्टडीकंसुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां० ॐअयाश्चाग्ने
स्यनभिशस्तिपाश्चसत्वमित्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषजंस्वा
हा इदमग्नये०ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहांतःतेभिर्नोअद्यसवि
तोत्तविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहाइदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्यो
मरुद्भ्यःस्वर्केभ्यश्च० ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय अथा
वयमादित्यव्रतेतवानागसोअदितयेस्यामस्वा० इदंवरुणाय० एताःप्रायश्चित्तसंज्ञ
काः ॐप्रजापतयेस्वाहा इदंप्रजापतये० इतिमनसा इदंप्राजापत्यं ततःसंस्रवप्राश
नम् ततःआचम्य ॐअस्यांरात्रौकृतैतच्चतुर्थीहोमकर्म्मणिकृताकृतावेक्षणरूपब्रह्म

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतम् अमुकगोत्रायाऽमुकशर्मणेब्रह्मणायद
क्षिणांतुभ्यमहंसंप्रददे इतिदक्षिणांदद्यात् स्वस्तीतिप्रतिवचनम् ततोब्रह्मग्रंथिविमो
कः ततःसुमित्रियानआपओषधयःसन्तु इतिपवित्राभ्यांशिरःसंमृज्यॐदुर्मित्रिया
स्तस्मैसन्तुयोस्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांदिशिप्रणीतांन्युब्जीकुर्यात् ततस्त
रणक्रमेणबर्हिरुत्थाप्यघृताक्तंहस्तेनैवजुहुयात् ॐदेवागातुविदोगातुंवित्वागातुमि
तमनसस्पतइमंदेवयज्ञꣳस्वाहाव्वातेधाःस्वाहा आम्रपल्लवेनजलमानीयमूर्ध्नि व
रोवधूमभिषिंचति ॐयातेपतिघ्नीप्रजाघ्नीपशुघ्नीगृहघ्नीयशोघ्नीनिंदितातनूर्जारघ्नी
ततएनांकरोमिसाजीर्यत्वंमयासह श्रीअमुकदेवा इतिमंत्रेण ततोवधूःस्थालीपाकं
प्राशयतिवरः ॐप्राणैस्तेप्राणान्संदधामि अस्थिभिस्तेऽस्थीनिसंदधामि ॐमां



For Private and Personal Use Only

सैस्तेमांसानिसंदधामि ॐत्वचातेत्वचंसंदधामि इतिमंत्रचतुष्टयेनप्रतिमंत्रांतेऽन्नंप्रा
शयेत् ततोवधूल्हृदयंस्पृष्ट्वावरःपठेत् ॐयत्तेसुशीमेल्हृदयंदिविचंद्रमसिश्रियं वेदाहंत
न्मांतद्विद्यात् पश्येमशरदःशतं जीवेमशरदःशतꣳशृणुयामशरदःशतमिति अथकं
कणमोक्षणादीनियुतग्रंथिविमोकादीनिआचारप्राप्तानि कंकणंमोचयाम्यद्यरक्षां
सिनकदाचन ॥ मयिरक्षांस्थिरांदत्वास्वस्थानंगच्छकंकण ॥ ततउत्थायवधूदक्षि
णहस्तस्पृष्टस्रुवेणघृतफलपुष्पपूर्णेनपूर्णाहुतिंकुर्यात् ॐमूर्धानंदिवोअरतिंपृथिव्या
वैश्वानरमृतआजातमग्निं कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः
स्वाहा इतिमंत्रेणपूर्णाहुतिः ततःस्रुवेणभस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना
ॐत्र्यायुषंजमदग्नेरितिललाटे ॐकश्यपस्यत्र्यायुषमितिग्रीवायां ॐयद्देवेषुत्र्यायुष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मितिदक्षिणबाहुमूलेतन्नोअस्तुत्र्यायुषमितिहृदये एवंवध्वाअपित्र्यायुषंकुर्यात् तत्र तन्नोइत्यस्यस्थानेतत्तेइतिविशेषः ततआचार्यायदक्षिणांदद्यात् होत्रेचदक्षिणांदद्यात् भूयसींदद्यात् ॥ इतिचतुर्थीकर्मसमाप्तम् ॥ इतिदशकर्मपद्धतिःसमाप्ता ॥

इदं पुस्तकं मोहमय्याख्यनगर्यां भगीरथात्मजहरिप्रसादेन " गणपत कृष्णाजी "
मुद्रणालये मुद्रापितम् । शकाब्दाः १८२६, संवदब्दाः १९६१.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## श्रीमद्भागवत सचूर्णिक..

यह भागवत सुगमचूर्णिका और टिप्पणसहित नई तरहका छपाया है जोकि पौराणिकोंको सप्ताह करनेमें, कथा करनेमें बहुतही उपयोगी है. यह विषय पुस्तक देखनेसे स्वयं विदित होजायगा. कीमत फकत् रु०८, ट० खर्चा माफ.

## देवीभागवत--सटीक माहात्म्यसहित।

यह पुस्तक बड़े परिश्रमसे शुद्ध करके बड़े अक्षरोंमें अति उत्तम कागजपर सुवाच्य टाईपका छपा हुआ तैयार है. की०रु० ६, ट०रु० १.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# हरिवंशसटीक माहात्म्यसहित.

यह पुस्तक शुद्ध करके उत्तम कागजपर सुंदर टाईपसे छपवाया है. की० टपालखर्चासह रु० ६ है.

## पुस्तक मिलनेका ठिकाना.

हरिप्रसाद भगीरथजीका पुस्तकालय. कालकादेवी रोड रामवाड़ी, मुंबईमें.

हनुमानदास ब्रजवल्लभजीका पुस्तकालय. चौक, कानपूरमें.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# कर्मकाण्डग्रन्थाः ।

| नाम. | की. | डा. म. |
|---|---|---|
| उपाकर्मपद्धति–यजुर्वेदी श्रावणी… | ०–८ | ०–२ |
| प्रेतमञ्जरी भाषाटीका … … | ०–५ | ०–१ |
| विवाहपद्धति बड़ा अक्षर ( पंजाबियोंकेलिये ) … … | ०–५ | ०–१ |
| पञ्चमहायज्ञविधि भाषाटीका … | ०–४ | ०–१ |
| पार्वणश्राद्ध मूल … … … | ०–२ | ०–॥ |
| पार्वणश्राद्ध भाषाटीका … … | ०–४ | ०–१ |

| नाम. | की. | डा. म. |
|---|---|---|
| गायत्रीपञ्चाङ्ग सपुरश्चरण रेशमीपुट्ठेका- | | |
| ” ” रफ कागज … | ०–१० | ०–२ |
| देवऋषिपितृतर्पण… … … | ०–१ | ०–॥ |
| लम्बोदरीहोमपद्धति … … | ०–४ | ०–१ |
| वासिष्ठीहवनपद्धति … … | ०–४ | ०–१ |
| श्राद्धविवेक ( इसमें सर्वश्राद्धोंकी विधिका निर्णय है ) … … | ०–१२ | ०–२ |

**हरिप्रसाद भगीरथजी, कालबादेवीरोड़ रामवाड़ी–मुंबई.**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

❀ ॥ इति दशकर्मपद्धतिः समाप्ता ॥ ❀

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only